पञ्चम अध्याय

रामगीतम् का सम्पादित-स्वरूप

प्रथमः सर्गः

॥ श्रीरामो जयति जगत्त्रयैकबन्धुः ॥ अविघ्नमस्तु ॥

नीता येनाविनीताः प्रसभममसुहृदस्त्रातभीता मराली
गीता यस्याविगीतामलचरितभृता चन्द्रशीता प्रशस्तिः ।
स्फीतामद्याप्यधीतामतिसुकृतिजनैर्यः प्रतीतार्थवाणीं
चक्रे भीतापहृत्यै कलयतु कुशलं सोद्य सीतापतिर्नः ॥[1] 1. ॥
धामात्युग्रमवारि येन दनुजोद्दामान्वयोच्छित्तये
श्यामानन्दिघनाघनद्युतिभृता कामाभिरामात्मना ।
नामानन्दितसज्जनावलिपरिक्षामाद्यदामाप्तये[2]
रामाकोटिशिखामणिच्छवियुजे रामाय तस्मै नमः ॥ 2. ॥
अभ्रैं राजितमभ्रमभ्रशितिभिर्व्याप्ता तमालैः क्षितिः
सन्दीप्तास्तडितः स्फुरन्ति परितः श्रीचित्रकूटालयम् ।
इत्थं प्रावृषि मा गमस्त्वमधुनाप्येकाकिनी काननं
प्रोच्यैवं रहसि प्रियां रमयतो रामस्य लीलावतु ॥[3] 3. ॥
श्रीचित्रकूटशिखरे विलसद्वसन्त-
मल्लीकदम्बसहकाररसामूहसान्द्रे ।
प्राणप्रियां जनकजां रमयन् रमेशो
रामः सदैव कुशलप्रकरं करोतु ॥[4] 4. ॥
वाचः पल्लवनं रसैकवलनं न्यायादिविद्याजुषां
भूयो दुर्लभमेव यद्विवदतां वैरस्यभाजां नृणाम् ।
तज्जानातितरां कलानिधिकविः श्रीकृष्णनामा मुहुः
श्रीमन्मैथिलनन्दिनीरमणसद्भक्तिप्रवाहादहो[5] ॥ 5. ॥

---

1 स्रग्धरा छन्द है ।
2 क—दामाप्तये, शार्दूलविक्रीडित छन्द है ।
3 मेघैर्मेदुरम्बरं·····रहः केलयः", गीतगोविन्द 1·1 से तुलनीय । शार्दूलविक्रीडित छन्द ।
4 वसन्त तिलका छन्द ।
5 ख—प्रभावादहो, शार्दूलविक्रीडित छन्द है ।

इदमलौकिकमाद्यरसात्मकं
कलितकोमलकाव्यकलाकुलम् ॥
रघुपतेर्विरुदं विजयं वचः
शृणु कविप्रवरस्य कलानिधेः ॥[1] 6 ॥

॥ अष्टपदी ॥ १. ॥

जय रघुवंशभूषणराम गिरिशादिशोभननाम ।
जय कामिनीमुखनयनमानसकमलवनसुखयाम ॥ 1 ॥ ध्रुवम् ॥
जय कायकल्पतरूपगततततरुणतामधुकाम ॥
जय रूपमधुरिममञ्जरीकुलकलितमोहितवाम ॥ 2॥

जय रघुवंशभूषणराम

जय लोकनयनविलोलमधुकरमधुरमधुरसधाम ।
जय भूमिकण्टकरावणादिकजनितदुःखविराम ॥ 3 ॥

जय रघुवंशभूषणराम

जय जह्नुजाजलधौतनिजपदकञ्जलसदभिराम ॥
जय मधुरमकराकारकुण्डलकलितललितललाम ॥ 4 ॥

जय रघुवंशभूषणराम

जय जय भवन्तं रूपवन्तं रसिकवयमुपयाम ।
जय जय विभो ! हे तव गुणावलिरिह हरतु भवदाम ॥ 5 ॥

जय रघुवंशभूषणराम

जय जय भयानककलिमहातपजनजलदविश्राम ।
जय कोटिकपटकुठारकं तव नाम रहसि जपाम ॥ 6 ॥

जय रघुवंशभूषणराम

जय देव मधुरिपुसागरे त्वयि नित्यमेव रमाम ।
तव चरणमखिलभवापवर्गदमेतदेव नमाम ॥ 7 ॥

जय रघुवंशभूषणराम

जय देव देहि समर्थतामितमिन्द्रियाणि दमाम ।
जय जनकजेश भजे यतोखिल पातकं विध माम ॥ 8 ॥

जय रघुवंशभूषणराम

इति राघवस्तुतिगर्भितं रमणीयमञ्चति[2]साम ।
कविदरकलानिधिभाषितं सुजने नमाम नयाम ॥ 9 ॥

जय रघुवंशभूषणराम

---

1 इस पद्य से ज्ञात होता है कवि अपने इष्टदेव के प्रति अतिशय भक्ति का प्रदर्शन इस शृङ्गार प्लावित पद्यकाव्य के माध्यम से करना चाहता है। द्रुतविलम्बित छन्द है।

2 ख—अञ्चित।

लोककोकयनशोकसन्ततोन्मोकवासरमणौ चिरन्तने ।
चित्तं सम्प्रविश रामनामनि, त्वं निकाममभिरामधामनि ॥[1] 7 ॥

॥ अष्टपदी ॥ २ ॥

सघनतमालतरुं ललिताकृतिमेकं सततकलितनयनामृतसेकम् ।
नौमि भवन्तमुदार ! जय जय राम विभो ! ॥ ध्रुवम् ॥ 1 ॥
चित्रकूटशिखरे रममाणमजस्रं मोदितमुनिजनमुख्यसहस्रम् ।
त्वामहमनिशमुपैमि शरणं रामहरे ॥ 2 ॥ सघन ॥
कोमलकामकलापरिशीलनदक्षं जनकसुतानयनैकसमक्षम् ।
त्वामिह नौमि रमेश ! राघव ! राम ! हरे ! ॥ 3 ॥ सघन ॥
उज्ज्वलरसवलितं कमलाशतललितं जनकसुताकेलीकुलकलितम् ।
नौमि त्वामहमीश ! रघुवर राम ! हरे ! ॥ 4 ॥ सघन ॥
सरयूमञ्जुतटे कृतनित्यविहारं मैथिलजालोचनसुखसारम् ।
त्वामनिशं कलयामि मामव राम ! हरे ! ॥ 5 ॥ सघन ॥
उपनिषदालयगं दलितभ्रमजालं मुनिजनमानसमधुरमरालम् ।
त्वदितरमिह नैवाहमीशे राम ! हरे ! ॥ 6 ॥ सघन ॥
विश्वामित्रमुनेरध्वरकृतरक्षं हतसुबाहुमारीचिविपक्षम् ।
त्वामलमहमनुदिनमेकमवित्रं राम ! हरे ! ॥ 7 ॥ सघन ॥
कपिपरिवारयुतं कृतलङ्कारोधं हत[2]लङ्केशनिशाचरयोधम् ।
शरणं त्वामहमस्मि यातो राम ! हरे ! ॥ 8 सघन ॥
श्रीकृष्णेन कलानिधिना कविनैवं कथितमुपासनविदलितदैवम् ।
संस्तवमिममाकलयेश केशव ! राम हरे ! ॥ 9 ॥ सघन ॥

कामात्यर्थाभिरामाकृतिरतुलरमाना[3]भरामानिषेव्यः
सामादिस्तोत्रधामा धवलतरयशोग्रामकामाभिगेयः ।
वामा क्षामत्रियामा परिवृढ[4]सुषमामानदामाप्तहारी
धामा सामान्यनामा कलयतु कुशलं कोपि रामाभिधानः ॥ 8 ॥

॥ अष्टपदी[5] ॥ ३ ॥

तादृशि सिन्धुजले तरणैकनिदानं धृतवानसि शृङ्गे जलायनम् ।
राघव भूशमद्भुतमीन ! तारय दीनजनम् ॥ 1 ॥ ध्रुवम् ॥

---

1 रथोद्धता छन्द है ।
2 क—ख—हृत ।
3 ख—रमामाम, स्रग्धरा छन्द है ।
4 ख—परिदृढ
5 इस अष्टपदी में कविकलानिधि ने क्रमशः दशावतारों का स्तवन किया है—मीन, कच्छप, वराह, नृसिंह, वामन, परशुराम, राम, बलराम, बुद्ध और कल्कि ।

मन्दरधरणविधौ धृतविपुलशरीरं पृष्ठ[1]कलितकण्डूसुखधीरम् ।
त्वामद्भुतकमठमुपैमि पालय दीनजनम् ॥ 2 ॥ तादृशि. ॥
यज्ञवराहतनुं गर्ज्जितदनुजेशं दशनशिखरकृतधरणिनिवेशम् ।
मामिम इव धृतनलिनीक ! तारय दीनजनम् ॥ 3 ॥ तादृशि. ॥
कठिननखरशिखरे धृतदानवकायं हरिमिव गजवरमथन ममायम् ।
त्वामहमगमं नरसिंह ! तारय दीनजनम् ॥ 4 ॥ तादृशि. ॥
छलयसि बलिमसुरं वञ्चितगुरुधिषणं वामनवरविभुपितखलमिषणम् ।
त्वामहमिह शरणं यामि पालय दीनजनम् ॥ 5 ॥ तादृशि. ॥
क्षत्रकुलैकवने दावानलरूपं नाशितनिखिलकोटिखलभूपम् ।
त्वामिह भृगुराम ! भजामि पालय दीनजनम् ॥ 6 ॥ तादृशि. ॥
चक्रे जनकगृहे गिरिशायुधभङ्गं विमदीकृतभृगुवर्यमतङ्गम् ।
सीताधव ! रघुवर ! राम ! तारय दीनजनम् ॥ 7 ॥ तादृशि. ॥
उत्क्षिपसे यमुनामाहितहलहेलं मदनिद्धुंतमिव निजतनुचेलम् ।
उद्धतबल जय बलराम ! तारय दीनजनम् ॥ 8 ॥ तादृशि. ॥
आसुरमतिहरणे निन्दसि मखकल्पं पृथयसि पशुवधकरण[2]मनल्पम् ।
रघुवर धृतबुद्धशरीर ! तारय दीनजनम् ॥ 9 ॥ तादृशि. ॥
कलिमन्तं नयसे वर्त्तितकृतकालं दलयसि खलयवनाधिपजालम् ।
समये कृतकल्किविधान ! तारय दीनजनम् ॥ 10 ॥ तादृशि. ॥
सुकविकलानिधिकृतमतिकोमलवचनं रुचिरचतुरुक्तिकरपदरचनम् ।
राघव दशलसदवतार ! तारय दीजनम् ॥ 11 ॥ तादृशि. ॥

वेदोद्धारकरं धृतक्षितिधरं विभ्राणमुर्वीभरं
दैत्येन्द्रासुहरं बलिच्छलनकृत्त्रैविक्रमाडम्बरम् ।
क्षीणक्षत्रपरं परं रघुवरं सीराग्रजाग्रत्करं
वन्दे जीवदयाधरं यवनहृत्कालान्तरं तं परम् ॥[3] 9 ॥

॥ अष्टपदी ॥ ४ ॥

भवदवदुःखनिवारण सुखकारण ए[4] ।
भवतिकरुणभरमाजि रघुवर राम रमे ॥ 1 ॥ ध्रुवम् ॥

---

1 ख—पृष्ट ।

2 ख—पशुबधकरुणमनल्पम् ।

3 इस पद्य में दशावतारों का सङ्क्षेप में स्तवन किया है । शार्दूलविक्रीडित छन्द है ।

4 गीतगोविन्द में सभी जगह अष्टपदी के प्रथमपाद के अन्त में "ए" अत्यन्त हर्ष का द्योतक है, या "हे" के अर्थ में प्रयुक्त हुआ है या रागपूर्ति के अर्थ में प्रयुक्त हुआ है । ऐसा गीतगोविन्द की सञ्जीविनी, जयन्ती, पद्यद्योतनिका व्याख्याओं में सङ्कलित है ।

—गीतगोविन्द महाकाव्यम्—संस्कृत परिषद,
उस्मानिया विश्वविद्यालय, हैदराबाद, 1969.

जनकसुतापरिरम्भण घृतसम्भ्रम[1] ए ।
निजजनसुरतरुरूप रघुवर राम रमे ॥ 2 ॥ भवदवदुःख. ॥
सरयूतटनवनागर गुणसागर ए ।
शोभितदिनकरवंश रघुवर राम रमे ॥ 3 ॥ भवदवदुःख. ॥
[2]दशवदनादिविलोपन वृतकोपन ए ।
साधुजनावनदक्ष रघुवर राम रमे ॥ 4 ॥ भवदवदुःख. ॥
निरवधिनिजकुञ्जलालय सुनिभालय ए ।
तव पदमतिरतिरस्मि रघुवर राम रमे ॥ 5 ॥ भवदवदुःख. ॥
[3]तव सुषमाजनरञ्जन भयभञ्जन ए ।
उपनिषदुज्ज्वलगीत रघुवर राम रमे ॥ 6 ॥ भवदवदुःख. ॥
कलिकलुषावलिकालन सुरपालन ए ।
नवघनलसदभिराम रघुवर[4] राम रमे ॥ 7 ॥ भवदवदुःख. ॥
सुरभियशोभरभासित सुखवासित ए ।
नयनचकोरकचन्द्र रघुवर राम रमे ॥ 8 ॥ भवदवदुःख. ॥
सुकविकलानिधिकूजितमतिपूजित ए ।
शृणु विरुदं शुभधाम रघुवर राम रमे ॥ 9 ॥ भवदवदुःख. ॥

श्रीजानकीनयननीलसरोरुहस्रक्-
सम्पूजितस्तदमितस्मितपुष्पवृष्ट्या ।
आच्छादितस्तनतदङ्गरुचापरीत-[5]
पीताम्बरः शमिह यच्छतु कोसलेन्द्र ॥ 10 ॥

प्रभोर्लीलावेशादुपगतवसन्तोदयलस-
ल्लतावृक्षश्रेणीललितसरयूतीरविपिने[6] ।
अनेकैः क्रीडन्तं किमपि निजकान्तं जनकजा
सखीवक्त्राम्भोजादभिलषितमेवासमशृणोत् । 11 ॥

॥ अष्टपदी ॥ ५ ॥

रघुपतिरिह विहरति ऋतुराजे ।
उत्सहते भवदागमनाय समुदित सकलसमाजे ॥ 1 ॥ ध्रुवम् ॥

---

1 क—सम्भर ।
2 क—ख—दशवदनादि ।
3 ख—तनु ।
4 क—रघुकुल ।
5 क-ख— आच्छादितस्ततदङ्ग, वसन्ततिलका छन्द है ।
6 क—विपने, शिखरिणी छन्द है ।

कोमलकलकोकिलकुल[1]कूजितमिलितमधुपमृदुगाने ॥ 2 ॥ रघुपतिरिह.॥
मञ्जुलवञ्जुलकुञ्जनिकुञ्जसुरञ्जितकुसुमपरागे ।
मदनचमूपतिविपुलपटध्वजकलितपवनमदनागे ॥ 3 ॥ रघुपतिरिह. ॥
विरहविधुरवामोपरिवक्रिमकलितपलाशविकाशे
वासन्तीपरिमलभरलम्पटसुस्थिरमधुपनिवासे[2] ॥ 4 ॥ रघुपतिरिह. ॥
अलिकुलसङ्कुलविकचवकुलतरुकुसुमावलिकृतमाले ।
सरयूतरलतरङ्गसमागमविलुलितललिततमाले ॥ 5 ॥ रघुपतिरिह. ॥
विकसितनवतमाल[3]तरुसङ्गतलतानिलयशुभशाले ।
प्रतिकुञ्जौदरमाहितनूतनकौसुमतल्पविशाले ॥ 6 ॥ रघुपतिरिह. ॥
पञ्चाशुगसुयशोमरणोभितचन्द्रचन्द्रिकाजाले ।
सुकविवचोविशदाकृतिविकसितसदतिमुक्तरसाले ॥ 7 ॥ रघुपतिरिह. ॥
मन्दपवनचपलीकृतचन्दनतरुसुरभितसकलाशे ।
मुखदखगीविलसत्खगनिवहगणिपतितरतिपतिपाशे ॥ 8 ॥ रघुपतिरिह. ॥
कनककेतकीविपुलपरागपराजितनवपटवासे ।
राजितरामसुबोधघनायनदर्शनकृतशिखिलासे ॥ 9 ॥ रघुपतिरिह. ॥
सुकविकलानिधिकथितमिदं शुभकवितारसकमनीयम् ।
राघवसन्तविलासमनुभ्रुवमेतु मनो नमनीयम् ॥ 10 ॥ रघुपतिरिह. ॥

मलयगिरिदरीषु प्रोन्मिलच्चन्दनद्रु-
र्मुजगगरलभारस्फारफूत्कारधारी ।
हरनिहतमनोजप्राणसंत्राणकर्त्ता
ज्वलयति विरहाग्निं दाक्षिणात्यः समीरः ॥ 12 ॥

सीतांशुद्युतिकौमुदीकृतसमुद्वेगा वियोगातुराः
कामिन्यः सततं हितश्रवणतः किञ्चित्कृताकर्णनाः ।
प्रोन्मीलत्सहकारशाखिविलसन्नव्याङ्कुरास्वादन-
क्रीडन्मत्तपिकीकुहूकलरवैर्भूयो भृशं तापिताः ॥ 13 ॥

माकन्दामलमञ्जरीमधुरिमास्वादोत्थनादोद्धताः
कूजन्त्याहितवेदना विरहिणां प्रोन्मुक्तकण्ठं पिकाः ।
किञ्च स्वागतदक्षिणानिलवशान्नृत्यन्ति नित्यं लता-
वध्वः पल्लवपाणिहस्तककलासन्दर्शनैर्मौहिकाः ॥ 14 ॥

---

1 ख—कोमलकलकोकिलकलकुल ।
2 ख—विलासे ।
3 ख—"नकूयाल" ।
"चिरपिल्वौ नक्तमालः करञ्जश्च करञ्जके" इत्यमरः ।

श्रीचित्रकूटाचललीलितोत्सुकं[1]
फुल्लद्वसन्तागमकेलिमस्पृहम् ।
सन्दर्शयन्ती रघुनाथनायकं
काचित्सखी प्राह समेत्य जानकीम् ॥ 15 ॥

॥ अष्टपदी ॥ ६ ॥

इह सरयूतटकेलिवने प्रियस्तव विलसति मोदधने ॥
कुसुमपरागविपुलपटवासैरहितकेलिविलासी ।
अरुणरजोभरमुष्टिभिरतुलवनिजसंसदिपरिहासी ॥ 1 ॥ ध्रुवम् ॥
घुसृणमसृणरञ्जिततनुकञ्चुक समयोचितरुचिशाली ।
कनकयन्त्रसञ्चितकुसुमोदकचालनचतुरनिभाली ॥ 2 ॥ इह सरयू. ॥
उन्मीलितमधुमधुरमालतीकुसुममनोहरमाली ।
कुञ्जलतासुमनोभरवर्षणसौहृदरसपरिपाली ॥ 3 ॥ इह सरयू. ॥
नलिनीवनमकरन्दपरागजसौरभसम्भृतभारम् ।
उपासीनमिवमन्दसमीरं कलयन्कलिविकारम् ॥ 4 ॥ इह सरयू. ॥
तव परिचिन्तननीतसुदुःसहमधुदिनयामविचारी ।
ईरितवानपि[2] सपदि तथा कुरु यथा याति सा नारी ॥ 5 ॥ इह सरयू. ॥
त्वयि करणौ कुरुते नयने त्वयि रसनामपि तव गाने ।
प्रत्यङ्गं पुलकयति समोदः त्वयि परिरम्भणदाने ॥ 6 ॥ इह सरयू. ॥
हा हा जनकराजवरतनये पत्यौ मा कुरु मानम् ।
वक्षसि कलितनिजप्रतिविम्बितदर्शनपरमनिदानम् ॥ 7 ॥ इह सरयू. ॥
तव विरहे रघुनन्दनचित्तं भ्रमति विना निजवित्तम् ।
मधुसमयेन किञ्च समयेरिहकेलिकलहमनिमित्तम् ॥ 8 ॥ इह सरयू. ॥
सेवित कविपदसुकविकलानिधिमुखचन्द्रामृतकल्पम् ।
शृणुत रामविशयेसुमहोज्ज्वलवर्णनमेतदनल्पम् ॥ 9 ॥ इह सरयू. ॥

रसालाग्रे कूजत्कुशलकलकण्ठीकलरवैः
कृते देशे देशे[3] रतिपतिनिदेशेद्यमधुना ।
बभूवुर्वेगारूढाः कवचपरिगूढामधुभरै-
र्मरुद्योधाः क्रोधादुपरिपरितो[4] धावत[5] इव ॥ 16 ॥

---

1 ख—"श्रीचित्रकूटाचललितोत्सकं" ।
2 ख—दूरितवानपि ।
3 ख—कृते देशे रतिपति, शिखरिणी छन्द है ।
4 ख—क्रौधादुपरितो ।
5 ख—धातव ।

सौन्दर्यस्य परोवधिः स्मितसुधासारप्रसर्पद्वचाः
सीताचञ्चललोचनाञ्चलचमत्कारैकविस्तारणः ।
कन्दर्पाकुलकामिनीजनचलच्चेतोवशीकारकः
शृङ्गारोदधिचन्द्रमाः सुखयतु श्रीराघवेन्द्रः सदा ॥[1] 7 ॥

इतिश्रीगीतराघवे रामाभिरामरमो नाम प्रथमः सर्गः ॥ 1 ॥

॥ द्वितीयः सर्गः ॥

सखीमुखोत्थं मधुरं वचो मुहुः
श्रुत्वापि सा तत्क्षणमप्रबोधती ।
विधाय वार्ताविविनाटमसम्मुखीं
काचित्पुनः प्राह जवेन जानकीम् ॥[2] 1 ॥

॥ अष्टपदी ॥ ७ ॥

चिन्तय कृतसरयूतटवासं रामं रतिपतिविहितविलासम् ॥ 1 ॥ ध्रुवम् ॥
केलिनिकुञ्जगृहेऽपि न सक्तं क्व नु हृदयं तव नीतम् ।
सम्प्रति किमपि कठिनमिव जातं यत्प्रथमं नवनीतम् ॥ 2 ॥ चिन्तय. ॥
कृतभवदागमनैकविचारस्त्वामभिलषति निकामम् ।
तव रतिवर्धनहेतुमुदारं वहति वेशमभिरामम् ॥ 3 ॥ चिन्तय. ॥
रामगुणाकृतिचित्रविचित्रं पश्यसि न दशदिगन्तम् ।
मीलसि किमु नयने मृगनयने कलयसि मानमनन्तम् ॥ 4 ॥ चिन्तय. ॥
चित्रं स तव लिखति रतिमित्रं क्षपितविरहदिनभारम् ।
तच्चरणे पातयति निजं वपुरुपचितमदनविकारम् ॥ 5 ॥ चिन्तय. ॥
एष एव तव चित्तचतुरिमायत्सुखयसि रघुनाथम् ।
वेदचतुष्टयगीतमनोहरगुणगणगौरवगाथम् ॥ 6 ॥ चिन्तय. ॥
निजमानसविभ्रमपरिरचितं विगतविमर्षममर्षम् ।
किमु कुरुषे तादृशगुणपुरुषे विस्तृतविरहजतर्षम् ॥ 7 ॥ चिन्तय. ॥
सरसकवित्वकलैककलानिधिसुकविकलानिधिकथितम् ।
आकर्णय जनकाधिपतनयेरामगीतमतिललितम् ॥ 8 ॥ चिन्तय. ॥

इत्याकर्ण्य सखीवचो जनकजा शृङ्गारलीलाभरै-
रात्मानं स्मरदारकोटिजयिनं सम्भूषयामास यत् ।

---

1 शार्दूलविक्रीडित छन्द है ।
2 वंशस्थ एवं इन्द्रवंशा के मिश्रण से बना उपजाति छन्द है।

तच्छ्रुत्वा रघुनन्दनोपि सरयूतीरे निकुञ्जालये
चक्रे कौसुमकेलितल्पकलनाकाङ्क्षां स्वकीयैर्जनैः ॥[1] 2 ॥

॥ अष्टपदी ॥ ८ ॥

सीता रघुपतिविनिहितचित्ता भूपयति स्वमतुलगुणवित्ता ॥ 1 ॥ ध्रुवम् ॥
काचन यक्षकर्दमैरालीकृतमुद्वर्तनदानम् ।
प्रोञ्छितवती कुसुमरसविसरैराहितवर्णविधानम् ॥ 2 ॥ सीता. ॥
सख्यानीतसरसतरचन्द्रकचन्दनसुरभितपयसा ।
सस्नौ बहुपरिचरणपराभिः सदृशीभिर्निजवयसा ॥ 3 ॥ सीता. ॥
अगरुधूपधूपितविनिवेशितमुरभिकुसुमकचभारा ।
शुशुभे सङ्गतसरससखीभिः कृतपरिहासविहारा ॥ 4 ॥ सीता. ॥
निजहितसखीरचितशुभवेणीमुक्तामणिसङ्ग्रथना ।
रेजेतरामधिकतरमधुरिमकृतरति[2]मानसमथना ॥ 5 ॥ सीता. ॥
आनखशिखमासञ्जितरञ्जनलसदञ्जनरुचिनयना ।
चतुरसखीविरचितबहुभूषणकृततनुरूपनिचयना ॥ 6 ॥ सीता. ॥
मुक्तामणिमण्डनमतमञ्जिमविहितायततमशोभा ।
कामिव सखीममोहयदिह नो कलितविलोचनलोभा ॥ 7 ॥ सीता. ॥
मञ्जुलमञ्जभासमनुसारिणमूहे कनकदुकूलम् ।
मण्डितवती निखिलवपुराली रामरतेरनुकूलम् ॥ 8 ॥ सीता. ॥
रघुपतिभक्तिभावमरसम्भृतसुकविकलानिधिकथितम् ।
शृणु सज्जनकवितोदधिमध्यगमेतदमृतमिव मथितम् ॥ 9 ॥ सीता. ॥

अङ्घ्रयोर्नूपुरयुग्ममञ्चितमणि मध्यमस्थलेमेखलां
पादाब्जाङ्गुलिभूषणानि च मिलन्माणिक्यमञ्जून्यलम् ।
केयूरी वलयानि मूर्द्धनि मणिस्ताटङ्कमुक्तावली-
त्येवं संविदधौ सखी सुचतुरा संतुष्य सीतातनौ ॥[3] 3 ॥

सर्वाङ्गे विरचय्य भूषणभरं माणिक्यमुक्तादिभि-
र्नित्यं मन्मथकामिनीनववयो[4]रप्याशुसम्मोहनम् ।
काचिन्मर्मसखी विहस्य कुचयोर्मुक्तावलीं पर्यधा-
देवैं त्वरितं भविष्यति रतानन्दस्य हिन्दोलिका ॥ 4 ॥

---

1 शार्दूलविक्रीडित छन्द है ।
2 क—कृतिरति ।
3 शार्दूलविक्रीडित छन्द है ।
4 क—ख—नयवयो, शार्दूलविक्रीडित छन्द है ।

इत्याश्रुत्य सखीवचः[1] कृतपरीहास[2] प्रमोदाकुल-
स्मेरास्यालिजनश्रुतं निजमनः सञ्जातलज्जाभरम् ।
उच्चैः श्रीजनकाधिराजतनया केलीसरोजे नतां
वक्षोजान्तपरीतपीतरजसा सन्ताडयामास सा ॥ 5 ॥

काचित्काञ्चनभाजनस्थमददाद्दिव्याङ्गरागद्रवं
काचित्कञ्चुलिकोचितं सुमनसां तोयस्य सारं पुरः ।
काचित्पूर्णसितांशु मण्डलनिभं कृत्वा पुरो दर्पणं
सर्वाङ्गीणसमेधमानसुषमां सन्दर्शयामास ताम् ॥[3] 6 ॥

प्रत्यङ्गप्रसरत्तरद्युतिभरप्रेक्षोद्भवन्मन्मथ-
प्रोद्यत्सायकवेध्यमानहृदया रामं स्मरन्ती मुहुः ।
तत्कालोदित तद्वियोगविकलस्वान्ता निशान्तान्तरे
सा तद्दर्शनसाभिलाषवचसा सावेगमूचे सखीम् ॥[4] 7 ॥

॥ अष्टपदी ॥ ६ ॥

दर्शय मे रघुनन्दनवदनम् ।
सायमुदितराकारजनीकरगञ्जनगुणगरणसदनम् ॥ 1 ॥ ध्रुवम् ॥
सरयूतीरविकासिमहीरुहदर्शनलालितनयनम् ।
कलहंसक्वणिताकर्णनतोवीक्षितकौसुमशयनम् ॥ 2 ॥ दर्शय. ॥
मञ्जुलमृदुमलयानिलमिलनादक्षिसमर्पितमुद्रम् ।
मधुसमयागमनोपचितामलबहुलप्रेमसमुद्रम् ॥ 3 ॥ दर्शय. ॥
चिन्तितकेलिकलाकलनाय निरन्तरमुत्सहमानम् ।
मम वियोगमुखचन्द्रविलोकनलसदानन्दनिदानम् ॥ 4 ॥ दर्शय. ॥
चटकाकलितचरणचटकारवसम्भ्रमभवदभिलाषम् ।
कवलीकृतकोकिलकुलकूजितकण्ठकलाकृतभाषम् ॥ 5 ॥ दर्शय. ॥
तारावलितललितहारावलितरलकिरणलसदिन्दुम् ।
रुचिरकुरङ्गशावशोभाधरमासितमृगमरविन्दम् ॥ 6 ॥ दर्शय. ॥
मन्दानिललुलदलकलतावलिविवलितललितकपोले ।
मिलितमकरिकापत्रमनोहरमुदितसुवर्णनिचोले ॥ 7 ॥ दर्शय. ॥
प्रततनुभूषणरुचिपटलीकृतकुञ्जतिमिरपरिहारम् ।
मदगजचलितकलितमुदितालीमानसमृतसुखभारम् ॥ 8 ॥ दर्शय. ॥

---

1 ख—स वचः, शार्दूलविक्रीडित छन्द है ।
2 क—ख—परोहास ।
3 शार्दूलविक्रीडित छन्द है ।
4 शार्दूलविक्रीडित छन्द है ।

श्रीकृष्णाभिधसुकविकलानिधिमुखकमलोदितमेतम् ।
शृणुत जनाः सीताचरितस्तवमतिशयपटिमसमेतम् ।। 9 ।। दर्शय. ।।

सीतावक्त्रसुधांशुरूपसुषमाचञ्चच्चकोरायितः
सौन्दर्यैकसुधाम्बुधेर्लहरिभिः प्रत्यङ्गमालिङ्गितः
आलीलोचनचञ्चरीकसुखदः शृङ्गारकल्पद्रुमः
श्रीरामोत्यभिराम[1]धामनिलयः शश्वत्करोतु श्रियम्[2] ।। 8 ।।

इति श्रीरामगीते कविकलानिधिकृते द्वितीयः सर्गः ।। 2 ।।

।। तृतीयः सर्गः ।।

लावण्यामृतसिन्धुवीचिनिचयोन्मीलन्महामाधुरी
प्रत्यङ्गप्रसरत्प्रमोदपरमश्रीशालिनीं जानकीम् ।
दीव्यद्दर्पणदर्शनोदितमनः कन्दर्पमन्दस्मिता-
मेतां काचिदुवाच वाचमुचितां तत्काललीलावहाम् ।।[3] 1 ।।

।। अष्टपदी ।। १० ।।

जानकि तव विरहेण दूयते रघुपतिरतिरतिशाली ।
गतिमतिततिसप्रेममना अपि भवदागमननिमाली ।। 1 ।। ध्रुवम्. ।।
तेन मिलामितलीलाशालिनि मा कुरु कमपि विलम्बम् ।
देहि परमविश्वासविधायिनि निजकरकमलालम्बम् ।। 2 ।। जानकि. ।।
त्वदमिलनेन परं परखिद्यतिमतिमतिरतिरतिलासा ।
लग्नमदनशरभग्नमना इव जीवय तं मुखभासा ।। 3 ।। जानकि. ।।
मलयानिललहरीभिरनन्तं वहसि वियोगमसह्यम् ।
प्रेमभरं कुरु तत्र विलासिनि कामयान[4]मिव वह्यम् ।। 4 ।। जानकि. ।।
एतावता सखीवचसापि न कलयसि गमनविचारम् ।
तत्र पतिः सीदति तव नितरामाहितमदनविकारम् ।। 5 ।। जानकि.
मनसि तमानय मानय मानिनि मानय मधुऋतुमेतम् ।
उन्मीलितमधुभरितमल्लिकापरिमलपुञ्जसमेतम् ।। 6 ।। जानकि. ।।
कामकलितकेलीकुलकलने रुचिमयसे न कथं वा ।
व्यर्थं वहसि विलम्बमलं किल भवधृतकेलिकदम्बा ।। 7 ।। जानकि. ।।

---

1 क—ख—श्रीरामोत्पभिराम ।
2 ख—श्रियः, शार्दूलविक्रीडित छन्द है ।
3 शार्दूलविक्रीडित छन्द है ।

श्रीकृष्णाख्यकलानिधिकविवरमार्पितमेतदशेषम् ।
कलय कर्णपुटयोरिह सीते पालय मदननिदेशम् ॥ 8 ॥ जानकि. ॥

इत्युक्ता[1] जनकाधिराजतनया सख्या रसख्यातया,
पूर्णप्रेमविवर्द्धनप्रचुरया सज्जाभिगन्तुं प्रियम् ।
लज्जामान्द्यविलग्नचेतसि तृणीकृत्योत्सुका दर्शने
तामाह प्रसभं सखि प्रणयिनं मां प्रापयेत्येव सा ॥ 2 ॥

श्रीखण्डाचलमारुते प्रवहति प्रोत्फुल्लकुञ्जद्रुम-
व्यालम्बिभ्रमरव्रजे परिलसद्वीणास्वनं गुञ्जति ।
श्रीमद्दाशरथिं प्रियाननसुधारश्मिश्रियं वीक्षितुं
संयाता सरयूतटं सह तया सख्या स्मरोत्कण्ठिता ॥[2] 3 ॥

प्रेयः प्रेमगजेन्द्रवाहनसमायुक्तिवेगोद्धुरे
दुर्विज्ञेय कथे मनोरथरथे रूढातिगूढाकृतिः ।
सख्या साकमियाय तत्र जनकक्षोणीन्द्रपुत्री स्वयं
यत्र श्रीरघुनायकस्य महसो[3] रेजुः प्रकाशाद्[4] दिशः ॥ 4 ॥

श्रीमन्नीलनिचोलमेघपटले भान्तीव विद्युच्छटा
सर्वाङ्गाभरणश्रियातिललिता लीलाविलासोन्मुखी ।
सीताशीतमयूखमानहरणप्रोदञ्चदास्यद्युतिः
श्रीरामेण समं तदैव मिलिता चित्ताभिलाषक्षणे ॥[5] 5 ॥

सीतादर्शनकामलोलहृदयः पूर्णाभिलाषप्रियः
तस्यै प्राज्यतरं प्रसादमददात्सख्यै रघूणाम्पतिः ।
अन्तः कुञ्जनिकेतनस्थसुमनस्तल्पाय सार्द्धं तया
सोत्यर्थं स्पृहयाम्बभूव सुरतक्रीडाविधौ तत्परः ॥[6] 6 ॥

आरादाराध्यसाराधिकरुचिररसासारधाराभिवर्षी
कारागारानु[7]कारातिशय ···[8]भवद्भीतिभारापनोदी ।

---

1 ख—इत्युक्त्वा, शार्दूलविक्रीडित छन्द है ।
2 शार्दूलविक्रीडित छन्द है ।
3 क—ख—महसा, शार्दूलविक्रीडित छन्द है ।
4 क—ख—प्रकाशादिशः ।
5 शार्दूलविक्रीडित छन्द है ।
6 शार्दूलविक्रीडित वृत्त है ।
7 'कारागारानु'—यह पाठ 'क' प्रति में नहीं है ।
8 दो ह्रस्व वर्णों की न्यूनता के कारण छन्दभङ्ग है । स्रग्धरा छन्द है ।

पारावारात्यपारामलगुणजलधिः स्वर्गदाराविहारा
हारातिक्रान्तहारावलिरुचिरतनुस्तात्सदा रामचन्द्रः ॥ 7 ॥

इति श्रीरामगीते कविकलानिधिकृते सीतारामिलनं
नाम तृतीयः सर्गः ॥ 3 ॥

॥ चतुर्थः सर्गः

मिलितां तां रघुपतिना, रतिनाथवशीकृतां सीताम् ।
नर्मसखीमर्मज्ञा, धर्मभृतां वाचमियमुवाचतराम् ॥ 1 ॥[1]

॥ अष्टपदी ॥ ११.

लीलया रतिशीलया सखि रमय राममनुरूपम् ।
त्वत्प्रणयैकविलासवशं रघुवंशशिरोमणिभूपम् ॥ 1 ॥ ध्रुवम् ॥
सुदति तवैव सुखाय पुरासरयूपुलिनागमशीलम् ।
स्वनिदेशैकवशंवदविधिकृत[2]विरचितमधुक्रतुलीलम् ॥ 2 ॥ लीलया. ॥
यत्र घुसृणचन्दनरसभरिता राजति कनकघटीयम् ।
तव परिधानकृते परिरचितावलसति सुतनु पटीयम् ॥ 3 ॥ लीलया. ॥
अरुणवर्णरजसा परिपूरितमिह तव केलिनिमित्तम् ।
राजति रमणि रजतमणिभाजनमनुरञ्जितजनचित्तम् ॥ 4 ॥ लीलया. ॥
इह पटवासरजोपि सुसञ्जितमतिशयकेलिनिदानम् ।
रमय रमस्व रमारमणेन समर्थय सकलविधानम् ॥ 5 ॥ लीलया. ॥
बहुतरपटभूषणनिर्वाधनलीलासाधनसज्जा ।
पश्यति सुमुखि सखीततिरेषा तवागमनमतिलज्जा ॥ 6 ॥ लीलया. ॥
[3]समुपगता रमणेन सह त्वं विरचय केलिकलापम् ।
रघुनाथेन साकमुररीकुरु विलसितममरदुरापम् ॥ 7 ॥ लीलया. ॥
सरयू पुलिनरुचिरमिदमङ्गणमुद्भासय तनुभासा ।
मदनवधूरनुकुरुते[4]या तव लीलितमियमपि का सा ॥ 8 ॥ लीलया. ॥
सीतानर्मसखीमुखकथितं सुकविकलानिधिरचितम् ।
शृणु सज्जनसन्ततसुखदायकमिदमक्षरमणिचरितम् ॥ 9 ॥ लीलया. ॥

---

1 उद्गीति छन्द है ।
2 क—विधिकृति, ख—वधिकृति ।
3 ख—सुमपगता ।
4 ख—रनुतेया ।

सख्योक्तमाकलितवान् रघुपुङ्गवोथ
सोत्कण्ठकेलिविधिनिर्मितिभूरिदक्षः ।
सीतामुखेन्दुमनुवीक्ष्य समन्ततस्त-
दानन्दनाय रघुनन्दन इत्युवाच ॥[1] 2 ॥

॥ अष्टपदी ॥ १२ ॥

पश्यत सख्य इमं शुभदेशम् ।
सरयूतरलतरङ्गजमारुतसमानीतजललेशम्[2] ॥ ध्रुवम् ॥ 1 ॥
वल्लीविपिनविलासवलितनरुकुसुमसमेतमिलिन्दम् ।
परिवादिनी तारभङ्कारजचमत्कारकृतनिन्दम् ॥ 2 ॥ पश्य. ॥
प्रियाकण्ठकोमलकलकूजितकलितकोकिलागानम् ।
अरुणतरुणपल्लवरुचिरञ्जितमञ्जुलकुञ्जवितानम् ॥ 3 ॥ पश्य. ॥
इह शिक्षयति समदविहगावनिरतुलमनोभवतन्त्रम् ।
स्थिरचरजातय इति विधिवशतो विदधति निधुवनतन्त्रम् ॥ 4 ॥ पश्य. ॥
इह कुञ्जे कृतमधुकरगुञ्जे गीतमदनगुणपुञ्जे ।
हरिणदृशं सखि मृशं प्रवेशय कथमिह पर्य्यनुपुञ्जे ॥ 5 ॥ पश्य. ॥
जनकसुतासम्भ्रमभरकारिणि रतिसुखधारिणि नित्यम् ।
इह सरयूपुलिनेन विलोकितमनुरसेतरकृत्यम् ॥ 6 ॥ पश्य. ॥
सीतायै दर्शयतु तदेतन्मधुऋतुवनमाधुर्य्यम् ।
मदनन्नृपति सौराज्यमिवागतमनुदिनमोदनधुर्य्यम् ॥ 7 ॥ पश्य. ॥
एषा विगलितनयननिमेषा पश्यतु विकचवमन्तम् ।
अधुना निजशरलक्ष्यी[3]कुरुते मदनो भुवनमनन्तम् ॥ 8 ॥ पश्य. ॥
श्रीकृष्णाभिधसुकविकलानिधिमुखमृतममृतसमुद्रम् ।
चुलुकय कर्णपुटेन रसिकवर विगलितवर्णनमुद्रम् ॥ 9 ॥ पश्य. ॥

शृण्वन्त्यां जनकाधिराजतनयायां स्वप्रियायां मुदा-
श्रीरामेण निरूपितं मधुऋतो[4]रेतत्परं वर्णनम् ।
श्रुत्वा प्रेमपयोधि पूरयति ताः पीत्वा सुधां श्रावणीं
सख्यो नर्मविलासमर्मरसिकाः शर्म प्रचक्रुस्तदा ॥ 3 ॥

स्विद्यन्तीमलमायतीं पुलकितां जाड्यान्वितस्तम्भिनीं
सम्भ्रान्तामिव विभ्रतीमितरतो दृष्टिं स्पृहां तन्वतीम् ।

---

1 वसन्ततिलका छन्द है ।
2 ख—जलजेशम् ।
3 ख—लक्ष्मी ।
4 ख—मधुरितो, शार्दूलविक्रीडित छन्द है ।

दृष्ट्वासौ जनकाधिराजतनयां लीलोन्मुखीमात्मना
श्रीरामोरमयाम्बभूव हृदयोत्कण्ठाभरं तत्क्षणात् ॥[1] 4 ॥

त्रैलोक्यालयधौवताङ्गसुषमासन्दोहमन्दीकृति-
प्रोद्यद्भूप विजृम्भितां जनकजामात्मानुरूपश्रियम् ।
पश्यन्दाशरथिर्निजप्रणयिनीं कन्दर्पबाणाहत-
स्वान्तः कान्तवरश्चकार रसिकः कां कां न केलिस्पृहाम् ॥ 5 ॥

चन्द्रश्चन्द्रिकया समुज्झित इव प्रोत्फुल्लपद्माटवी
पद्मावाससमुज्झितेव विकसत्कुञ्जप्रसूनावलिः ।
माध्वीस्पन्दनमन्थरेण समभूदानन्द्य सीतातनां
शृङ्गारप्रसरार्पिलत्विप सखीलोकैः कृतायामहो ॥ 6 ॥

नानाहासविलासभासितमुखप्रोल्लाससंलापिनि
कञ्चिद्वक्रिमशालिकान्तमुखग प्रोद्यत्कटाक्ष[2]च्छटा ।
सीतानर्मसखीवचोभिरतनु प्राप्तेषु लक्ष्यीकृता[3]
काञ्चित्किञ्चन नो जगाद रहसि स्तब्धेव तत्राभवत् ॥ 7 ॥

रामप्रेमविघूर्णमानहृदया तद्वक्त्रचन्द्रद्युतिः
प्रोदञ्चत्पृथुलालसाचटुलदृक् चेतश्चकोरायिता ।
पश्यन्ती जनकाधिराजतनया तन्दुर्लभं वल्लभं
स्वानन्दामृतसागरोत्थलहरीवृन्देष्वमज्जत्तराम् ॥ 8 ॥

सीतारूपविमोहितः कृतपरीहासः सखीनां गिरा
तत्कारुण्यवशः प्रशस्य च[4] धनुर्भक्त्वा महोत्साहकृत् ।
संशीर्यद्भृगुराजवीर्यदहनस्त्रासं ददद्विद्विषां
चक्षुश्रोणितदृष्टिविस्मितरुचिर्देयादमेयाः श्रियः ॥ 9 ॥

इति श्रीरामगीते कविकलानिधिकृते प्रियाप्रियसङ्गमो नाम चतुर्थः सर्गः ॥ ४ ॥

---

1 यहां से लेकर सर्गान्त तक के श्लोक शार्दूलविक्रीडित छन्दोबद्ध हैं ।
2 ख—कटाच्छ ।
3 ख—लक्ष्मीकृता ।
4 क—प्रदात्य च, ख—प्रशय च ।

।। पंचमः सर्गः ।।

अथ सीतारतरीतावुत्साहवती वियोगलवभीता ।
अभिरामं रघुरामं रमयितुमामन्त्रयत्सखीः सर्वाः ।।[1] 1 ।।

ताः सानन्दवसन्तकेलिकलनाकौतूहलोत्कर्षिका ।
हर्षेणैकत आनयन् रघुपतिं सर्वे सुहृद्दिभर्युतम् ।
लीलालालसमानसां जनकजां कृत्वैकतः सङ्गता-
मालीमाधवकेलिकौशलकलां कर्तुं समूचुः समाः ।।[2] 2 ।।

।। अष्टपदी ।। १३ ।।

हे जानकि ! हे राघव ! सम्प्रति रमणमुभौ सन्तनुतम् ।
सारवजलसङ्गी हि सनीरः सुखमनुभवतं तनु तम् ।। 1 ।। ध्रुवम् ।।
अङ्कुरयति तरुवल्लीविपिनं मधुरयमधिकविकासी ।
तद्वलतोधिकिरति रतिनाथो विशिखानतिरतिभासी ।। 2 ।। हे जानकि. ।
युगलं युवयोरञ्चितसुवयोवञ्चितसुरपुरलीलम् ।
रमतानाखिलसतर्षविलोचनसन्ततहर्षणशीलम् ।। 3 ।। हे जानकी. ।।
सुरतरनयनभागधेयं बहुकुरुतं सहजविहारम् ।।
धारयतं पुनरिह सङ्ग्रथितं हृदि मुक्तामयहारम् ।। 4 ।। हे जानकि. ।।
लीलावेशवशंवदयोरिह युवयोरतिपरिपाटी ।
जयतु वयतु सुरवधूरनुक्षणविस्मृतविहरणघाटी ।। 5 ।। हे जानकि. ।।
कुरुतं युवामधिकमुरुतं पिकमालापितनिजवचसा ।
कामवधूरपि विजितप्राया भवतु विराजतु न च सा ।। 6 ।। हे जानकि. ।।
अयि रघुराजकुमार परस्परमयि जनकाधिपतनये ।
रमतं युवागतनुमतवश्यौ मोदगिरं सञ्जनये ।। 7 ।। हे जानकि. ।।
सज्जः सकलसखीपरिवारः सुरभिकेलिरपि सज्जा ।
अथ न कलयतं केलिविलम्बं द्रुतमपगच्छतु लज्जा ।। 8 ।। हे जानकि. ।।
नर्मसखीभिरुदाहृतमेतत् सुकविकलानिधिकथितम् ।
शृणुत सकलरसिकानिततरामिव वेदचतुष्टयमधिकृतम् ।। 9 ।। हे जानकि. ।।

एतन्नर्मसखीवचो रघुपतिः सीता च लीलोत्सुका
संश्रुत्य श्रुतिमाधुरीमयमहो लीलामहोत्साहदम् ।

---

1 गीति छन्द है ।
2 शार्दूलविक्रीडित छन्द है ।

दृप्त स्व स्वसखीसमाजकलितौ सानन्दशीलावुभौ
चातुर्य्यादुदतिष्ठतां विलसितुं प्रेमप्रसन्नौ प्रियौ ॥[1] 3 ॥

॥ अष्टपदी ॥ १४ ॥

उत्थिते रघुवंशदीपे कलितसखीसमीपे ।
मधुकेलिमञ्जुलमाधुरी रुचिराधिकं दिदीपे ॥ 1 ॥ ध्रुवम् ॥
जनकाधिपस्य सुतापि सा सङ्गतसखीकदम्बा ।
रमणेन तेन रमाधिका विललासगतविलम्बा ॥ 2 ॥ उत्थिते. ॥
वरनायिका सुखदायिका गुणगायिकाभिमुदिता ।
उदसाहयच्चिजकामिनं केलीकलासमुदिता ॥ 3 ॥ उत्थिते. ॥
भृकुटीविलासविशेषितामृदुहासिमासिवदना ।
भृशमालिलिङ्गदृशैव सा प्रियमधिकरूपसदना ॥ 4 ॥ उत्थिते. ॥
दिविमुदितदैवतमण्डलीसुरयानसमधिरूढा ।
विस्मृत्य ननु तनु चेतसी समजनि यथा विमूढा ॥ 5 ॥ उत्थिते. ॥
मुरजादिवाद्यपरिवादिनीवहुतालल्यसमेता ।
समवादयन् गुणशालिनो गिरिशोपि यद्विनेता ॥ 6 ॥ उत्थिते. ॥
इह जानकीरघुनाथयोरन्तरमतीवलग्नम् ।[2]
मदनोपि नूनममोदयत्[3]समुपेत्य शुभसुलग्नम् ॥ 7 ॥ उत्थिते. ॥
इति तत्समाजसमागमे त्रिभुवनमनन्तमूहे ।
आनन्दमन्तरमुल्लसत् समजनि सखीसमूहे ॥ 8 ॥ उत्थिते. ॥
रघुनाथकेलिकलामिमामवनीसुतातिसमुदम् ।
श्रुत्वा कलानिधिभाभया मुदमयतु[4] हृदयकुमुदम् ॥ 9 ॥ उत्थिते. ॥

रघुवरमधुलीलां भूरिसम्मोदशीलां
जनकनृपसुतायाः प्रेमकेलीविमिश्राम् ।
नभसि समवलोक्य स्वर्गिणोदारयुक्ता
मनसि मुदमुदारामानयन्मानवर्जम् ॥[5] 4 ॥

वीणावेणुमृदङ्गझर्झरझणत्कारैः समं झल्लरी
संयुक्तामृतकुण्डलीरवचमत्कारः स तत्रामवत् ।

---

1 शार्दूलविक्रीडित छन्द है ।
2 ख—अन्तरवतीव ।
3 ख—नूनमनोदयत् ।
4 ख—मदमुदयतु ।
5 मालिनी छन्द है ।

आल्यश्चाधिकचातुरीविरचितं सङ्गीतगानं दधुः
श्रुत्वा यद्भुवनत्रये जनमनः सम्प्राप सानन्दताम् ॥[1] 5 ॥
तस्मिन्समाजे परिज्ञायमाने
तौर्यत्रिकैस्तानवितानगाने ।
रेमे रमारामरमाधवेन
रमाधिकः श्रीरमयाभिरामः ॥[2] 6 ॥

एकैकाः कमलाननाः किल कलानाथैकजैत्रत्विषः
कामिन्यः सकलाः कलासु कुशला या नृत्यगीतादिषु ।
तासां मध्यगता विदेहतनया वैदग्ध्य वारांनिधे-
र्वेणीव न्यपयाम्बभूद रमणं प्रेम्णा मनो मूमुहत् ॥[3] 7 ॥

वाद्यत्सु त्रिदिवालयैरपि समास्वाद्येषु वाद्येषु सा
केलीपुष्टिमवापिता जनकजा रामप्रमोदावहा ॥
नानन्दं प्रससार सारसुषमासारप्रकर्षावहा
कः कस्तत्र विमोहितो न दिविषत्स्वे स्वे विमाने स्थितः ॥ 8 ॥

सीतालोचनलालनैकविलसल्लावण्यलक्ष्मीभरः
शृङ्गाराम्बुनिधेस्तरङ्गपटलैः सङ्कच्छदङ्गच्छविः ।
प्रोद्भूतभ्रकुटीविलासविगलत्कन्दर्पकोटिप्रभा-
सञ्चारो वरिमत्तु भूरिमविकस्वाभाविकोद्भावनम् ॥ 9 ॥

॥ इति श्रीरामगीते कविकलानिधिकृते पञ्चमः सर्गः ॥

॥ षष्ठः सर्गः ॥

तस्यां मधुलीलायां, सीतारामप्रमोदशीलायाम् ।
समदावुभौ समेते,[4] परमसमेतेन मित्रसार्थेन ॥ 1 ॥

॥ अष्टपदी ॥ १५ ॥

खेलति वने जनकजा रघुकुलाभरणेन ।
कनकमणिमययन्त्रसञ्चितधृसृणरसभरणेन ॥ 1 ॥ ध्रुवम् ॥

---

1 शार्दूलविक्रीडित छन्द है ।
2 इन्द्रवज्रा व उपेन्द्रवज्रा के मिश्रण से बना उपजाति छन्द है ।
3 यहां से सर्गान्तपर्यन्त श्लोक शार्दूलविक्रीडित छन्द के हैं ।
4 स—रमेते, गीति छन्द है ।

अरुणकेलिरजोभरेण दिगन्तसुविसरणेन ।
भूयसा पटवासकेन सुगन्धितावरणेन ॥ 2 ॥ खेलति. ॥
किञ्चिदाकुञ्चितकटाक्षगमदशरसरणेन[1]
जानकीतत्प्रियपरस्परकलितसुविहरणेन ॥ 3 ॥ खेलति. ।
जनकतनयामण्डलीमधुकेलिकलकरणेन ।
रसिकरघुपतिरससमाजगयुवतिपरिचरणेन ॥ 4 ॥ खेलति. ॥
जानकीशसखीपरस्परकृतहठाचरणेन ।
हेलयाहितमेलयाकृतमोदसुवितरणेन ॥ 5 ॥ खेलति. ॥
तत्र साहितसख्युपाहृतयन्त्ररसभरणेन ।
रसघटेन बलेन सिञ्चति राममनुसरणेन ॥ 6 ॥ खेलति. ॥
रामोपि घन इव रसमयो रससारनिर्झरणेन ।
तामिमामसिञ्चत्[2]मामिहखलिवनवरणेन ॥ 7 ॥ खेलति. ॥
कृतपरस्परसखीशिक्षणकेलिकुलकरणेन ।
जितपराजितमव्यवस्थितमजनिनिस्तरणेन ॥ 8 ॥ खेलति. ॥
कविकलानिधिकलितमिदमतिशयचमत्कृतिकारि ।
जानकीधवलीलितं शृणु रसिकमानसहारि ॥ 9 ॥ खेलति. ॥

पश्यत्सु त्रिदिवालयेषु नितरां विस्मृत्य चेतस्तनू
कुर्वत्सु स्फुटकल्पवृक्षसुमनो वृष्टिं विमानाग्रतः ।
स्ववाद्यानि च वादयत्सु परितो गन्धर्वराजेषु तत्-
सीतारामविनिर्मितं विलसितं भूयो विरेजेतराम्[3] ॥ 2 ॥

उन्मीलन्मधुकेलिकौतुककलाविष्टस्फुरज्जानकी-
कान्तस्वान्तनितान्तरोपितशरौघे निर्विशेषं स्मरे ।
व्यामिश्रप्रसराः प्रियाप्रणयिनोर्वक्राकटाक्षच्छटा-
नीलाम्भोरुह पुण्डरीकपटलारम्भं प्रचक्रुस्तराम् ॥[4] 3 ॥

सीतामञ्जुमुखारबिन्दविलसन्माधुर्यभृङ्गायितः
श्रीरामो जनकात्मजा रघुपतेः पूर्णेन्दुबिम्बे मुखे ।
चक्षुर्भ्यां चटुला चमत्कृतकरी चञ्चच्चकोरीव सा
तावेतौ कुरुतां स्वभक्तभवने भूयस्तरं भावुकम् ॥[5] 4 ॥

॥ इति श्रीरामगीते कविकलानिधिकृते मधुकेलिवर्णनं नाम षष्ठ : सर्गः ॥ 6

---

1 ख—मदनसरणेन ।
2 ख—ममिचत्त ।
3 चतुर्थ पाद 'ख' प्रति में उपलब्ध नहीं होता । शार्दूलविक्रीडित छन्द है ।
4 शार्दूलविक्रीडित छन्द है ।
5 शार्दूलविक्रीडित छन्द है ।

॥ सप्तमः सर्गः ॥

अथोदियाय पूर्णतां दधान एव शीतरुक् ।
कुमुद्वतीकदम्बदन्धुरम्बुजद्विषत्तमः ॥[1] 1 ॥

दिगङ्गनामुखाब्जचारु कुङ्कुमानुलेपभूत् ।
प्रदोषतां ततान सेमकुम्भभेदकेसरी ॥[2] 2 ॥

पूर्वं पूर्वदिगङ्गनोज्ज्वलमुखे काश्मीरलेपप्रदः
पश्चात्कौसुमवारिघर्षितघनश्रीखण्डशोभाकरः ॥
भूयो भर्तृवियोगभङ्गुरभवद्भामाननाभाषितः
श्यामामालनले विभाति विलसत्सौभाग्यविन्दुः शशी ॥[3] 3 ॥

अम्भोजानि विमुद्रितानि रहितश्चक्राङ्गनासङ्गमः
प्रोल्लासं समवायकैरववनी हृष्टश्चकोरीगणः ।
कालेनैतदकारि सोपि रघुपस्त्वत्कैलिवाञ्छावशः
सापि श्रीजनकात्मजा रुचिवशा सिद्धं समस्तं ततः ॥ 4 ॥

श्यामां शरच्चन्द्रिकयाभिरामां
रामाङ्गसङ्गोत्कलिकां च सीताम् ।
संवीक्ष्य सा नर्मसखी समोदा
रघूद्वहं वाचमिमामुवाच ॥[5] 5 ॥

॥ अष्टपदी ॥ १६ ॥

अद्य रसिकरघुवंशविभूषण लसति निशारमणाय[6] ।
उन्मीलति मधुमधुरमाधवीमन्मथविक्रमणाय[7] ॥ 1 ॥ ध्रुवम् ॥
अद्य चपलसरयूजलशीतलवीचिविसरलसिताय ।
वाति मरुत्तरुगुल्मलतावनकुसुमविकासहिताय ॥ 2 ॥ अद्य. ॥
अद्य ललिततारहारावलिरजनिरमणिरुचिताय ।
विधुसन्निधये भूषणविधये पश्य मदनविहिताय ॥ 3 ॥ अद्य. ॥

---

1 अनुष्टुप् छन्द है ।
2 वही ।
3 शार्दूलविक्रीडित छन्द है ।
4 क—ख—रघुपस्वत्, शार्दूलविक्रीडित छन्द है ।
5 उपजाति छन्द ।
6 ख—रमणीय ।
7 ख—विक्रमणीय ।

अद्य किमपि सरयूरानन्दितहृदयैवानुमिताय ।
कलितलौलकल्लोलकुलाकुलसलिला नदति रताय ॥ 4 ॥ अद्य. ॥
त्रिदशसमर्पितसुरतरुकुसुमैरर्च्चति वरिवसिताय ।
चरणकमलयुगलाय तवेयं सञ्चितनिजसुकृताय ॥ 5 ॥ अद्य. ॥
परितो हरितो हरितोपजमुखसुरकुलमुखहसिताय ।
सूचयन्त्य इव दधति विकाशं त्रिभुवनसमवसिताय ॥ 6 ॥ अद्य. ॥
सीताप्राणवल्लभप्रियतमरघुवरविधिविहिताय ।
सहजसमयशोभाविहिताय न कामयसे ललिताय ॥ 7 ॥ अद्य. ॥
तव निदेशवर्ती सकलो विधिरुदयति ते महिताय ।
अनुकूलयति केलिसामग्रीमतुलानन्दमताय ॥ 8 ॥ अद्य. ॥
हंहो हरे हृदयहर्षणकर सीतासुखसुहिताय ।
अर्थयतेयं सुकविकलानिधिरन्तरपुटनिहिताय ॥ 9 ॥ अद्य. ॥

इति श्रुत्वा रामः प्रसरदभिरामद्युतिभरः
प्रियासीतायुक्तः सखिभिरभियुक्तः सुललिते ।
विलासे प्रोल्लासं दधदधिकहासं विरचयन्
वनान्तः सङ्घानं सरमणविधानं समतनोत् ॥[1] 6 ॥

॥ अष्टपदी ॥ १७ ॥

रामो विहरति सरयूविपिने कोटिवधूसहितस्मरसुदिने ।
जनकसुतैकसुन्दरीसङ्गे तनुरुचिजनितकामरुचिभङ्गे ॥ 1 ॥ ध्रुवम. ॥
तत्र ततान मुरलिकानादं दलितसमनुगतभक्तविषादम् ।
वर्षतीव हृदि मदनविनोदं वनितालतानिवहकृतमोदम् ॥ 2 ॥ रामोविहरति. ॥
आननचन्द्रसुधारसधारा निपततीव लीलारुचिसारा ।
तदनुगतं शतरमणीवृन्दं गायति कलितकिन्नरीनिन्दम् ॥ 3 ॥ रामोविहरति. ॥
प्रियमुरलीरवमिश्रिततानं क्वचन बभूव सुन्दरीगानम् ।
क्वचिदसन्नजनकजागीतं बभौ राममुरलीपरिवीतम् ॥ 4 रामोविहरति. ॥
एवं रमणि रमणसुविहारे मदनबाणविरचितविस्तारे ।
पुष्पावचयकेलिरतिशयिता कृता मिथो मण्डनविधिदयिता ॥ 5 ॥ रामोविहरति. ॥
फलपल्लवकुसुमौघविधानं तदखिलमण्डनमासमानम् ।
विपुलकुसुमकन्दुकगणलीला सकलसमाजविनोदनशीला ॥ 6 ॥ रामोविहरति. ॥
चक्रैखिलैरधिककमनीया सकलविमानचारिनमनीया ।
मधुसविकासलतातरुललितं रेजे सदस्तदा रुचिकलितम् ॥ 7 ॥ रामोविहरति. ॥

1 शिखरिणी छन्द है ।

रमारमणिरामप्रियरचितं हेमहरिन्मणिशोभाखचितम् ।
स्वस्वावचितकुसुमभरपूर्णं वसनाञ्चलगणमूहे तूर्णम् ।। 8 ।। रामोविहरति. ।।
विकचवसन्तसमाज इवायं रेजे दधद्विभूषितकायम् ।
सुकविकलानिधिगीतमशेषं शृणु जनरामवेणुविनिवेषम् ।। 9 ।। रामोविहरति. ।।

काचिद्गायति तालमन्यवनिता दत्तेतिमत्तेक्षणा
वीणां वादयते च काचनपरासङ्गे ददाति स्वरम् ।
एवं सर्वसमाज एव दधति स्वैरं रसोत्साहितां
मध्ये श्रीरघुनाथवेणुरणितं रेजेऽखिलोत्साहदम् ।।[1] 7 ।।

रामः कामनिकामकामदवपुर्वैमानिकीरङ्गनाः
सर्वा मोहयति स्म वेणुरणितैः पीयूषधारासरैः ।
यास्तास्त्वादुभरेण भूरिविवशाः प्रेमप्रसारस्खल-
न्नीव्यः कामशराहता विमुमुहुः पश्यत्सु कान्तेष्वपि ।। 8 ।।

वीणावाद्यसमानतानकलितैः सङ्गीतगानक्रमै-
रङ्गीकृत्य विचित्रभङ्गिरुचिराः केलीर्वनान्तस्थिताः ।
ताः कृत्वा वनिताः प्रियैकजनितात्यन्तप्रमोदान्विताः
सम्मत्ताः सरयूनिकुञ्जभवनान्यापूरयन्सर्वतः ।। 9 ।।

पुष्पोद्यानवचीय[2] कन्दुककलक्रीडासकौतूहलाः[3]
पौष्पैः कङ्कणकर्णिकाङ्गदमहाहारस्रजां मण्डनैः ।
अन्योन्यं प्रतिभूषिताङ्गलतिकालावण्यलक्ष्मीजुषः
प्रत्येकं रभसेन रामरसिकं सम्मोदयाञ्चक्रिरे ।। 10 ।।

भूषाणां रत्नमञ्जीरक इव रुचिरा शेषधीरध्वनीनां
वाद्यानां मध्यमध्यक्वणितपरिलसत्सप्ततन्त्रीयुतानाम् ।
श्रीरामोदीर्णवेणुक्वणितभरभवद्भूरिगम्भीरघोष-
स्वाद्यानां काननान्तः किमपि सभवत्तारझङ्कारभारः ।।[4] 11 ।।

स झङ्कारध्वानो दिवि सुरविमानोपरिगतः ।।
स्मरारि ब्रह्मेन्द्राद्यखिलमनसां मोहनपटुः ।

---

1 यहाँ से दसवें श्लोक तक शार्दूलविक्रीडित छन्द है ।
2 ख—पुष्पोद्यानवचीय ।
3 ख—क्रीडासुकौतूहलाः ।
4 स्रग्धरा छन्द है ।

अमन्दस्वच्छन्दत्रिभुवनवशीकारकरणे
महामन्त्रो भूत्वा मुदमतिमुदामाततताम् ॥[1] 12 ॥

शृङ्गाराञ्जनजातरञ्जनचलत्सीताकटाक्षच्छटा
श्रीरामेक्षणदानवल्गुवलिता श्यामावदातश्रियः ।
नीलाम्भोरुहपुण्डरीकपरिपत्प्रोद्यच्च लक्ष्मीभराः
कल्याणं कलयन्तु केलिकलयाकीर्णोच्चकामोत्करा: ॥[2] 13 ॥

इति श्रीरामगीते कविकलानिधिकृते सप्तमः सर्गः ॥

॥ अष्टमः सर्गः ॥

भीता सीता निशातैः रतिपतिविशिखैः केलिकांतूहलाढ्या
कुञ्जे कुञ्जे निकुञ्जे मधुपमधुकरीगीष्पकेलीविलोक्य ।
क्रीडाव्रीडाननाथो सखिमुखवचनासौ विलासे विलासे
तृष्णा निष्णातचित्ता पुनरपि रघुपं वाचमूचे विचार्य ॥[3] 1 ॥

॥ अष्टपदी ॥ १८ ॥

जानकी वदति रमणं रमानायिका रासलीलामनोमोदशीला ।
शुभारच्यतामद्य रतिकामरुचिदायिका ॥ 1 ॥ ध्रुवम् ॥
कुञ्जसल्लीवने विकचकुसुमावली निपतदलिराजरिहरामगुणगायिका ॥
ईशगुञ्जितमामविकमञ्जुरवाकलितमधुपानमदसम्भ्रमनिचायिका[4] ॥ 2 ॥
जानकी. ॥

वहति मृदुपवनलहरीमधुरमाधवीकुसुममकरन्दरसवृन्दपरिचायिका ।
विकचमाकन्दविसरेण साकं दलितललितलतिकारतिविधायिका ॥ 3 ॥
जानकी. ॥

जोपमासत इमे वनतरुषु कोकिलासदनवीणेव पुनरियमहो भायिका ।
भरति कांतूहलं भूरिभृङ्गावली सपदि सङ्गीतभृङ्गीकलनमायिका[5] ॥ 4 ॥
जानकी. ॥

---

1 शिखरिणी छन्द है ।
2 शार्दूलविक्रीडित छन्द है ।
3 स्वग्धरा छन्द है ।
4 "ईशगुञ्जति ·····निचायिका" यह पाठ ल प्रति में नहीं है ।
5 "भरति·····यिका" यह पाठ क प्रति में नहीं है ।

प्रथममतिलोलितं व्रजे भविता[1]कृतं तस्य न स्मृतिरिदानीमपि विधीयते ।
उदयते सकलकलपूर्णमण्डलीरया चन्द्रमा निजमनसि किमिति न विधीयते[2] ॥ 5
जानकी. ।

विविधवादनवती दिवि च किन्नरतती रसिकवररासरसिता मनसि दीयते ।
तट्टदप्सरस इह नृत्यविधिसज्जिता रमण भवतो नु किं कौतुकमुदीयते ॥ 6 ॥
जानकी. ॥

लुलितनवपल्लवावलिविनोदवहा लसति सरयूवनी नहि दृशा[3] पीयते ।
प्रसृत घनसारमयमृदुलतरवालुका लसति विशदातटीचित्तमनुनीयते ॥ 7 ॥
जानकी. ।

निभृतमिह पूर्यते सकललीलारसो न भवदभिलापिता किमिति सञ्चीयते ॥
सकलरसरसनसुविलसनरसिको भवानद्भुतं लीलितं किमिति न निचीयते[4] ॥8 ।
जानकी. ॥

जानकी कामितं केलिकलयामितं नित्यमुपनामितं कृष्णकविभाषया ।
रासलीलामतं किमपि विज्ञापितं[5] प्रेयसे सीतया विलसदभिलाषया ॥ 9 ॥
जानकी. ॥

इत्याकर्ण्य प्रेयसी मञ्जुवाक्यं
रासक्रीडादक्षिणो रामचन्द्रः ।
तत्कालोत्थानन्दभाजं समाजं
चित्तादाविर्भावयामास शीघ्रम ॥[6] 2 ॥

तत्रैवादौ जानकीप्रार्थितानि
ज्ञात्वा जातो रामवंशीनिनादः ।
तेनाकृतान्तत्र कान्ताः समीयु-
र्लक्ष्मीरूपाः काननान्तःस्थलेभ्यः ॥ 3 ॥

जातं राधाकृष्णरूपेण रासं
सीतारामौ चिन्तयित्वा स्वचित्ते ।
भूयोप्याविर्भावयाञ्चक्रतुस्तौ
युक्तं लक्ष्मीकोटिरामासमूहैः ॥ 4 ॥

एको रामः कोटिरामासमूहै
रेमे यावन्त्येव रूपाणि धृत्वा ।

---

1 ख—भवतां ।
2 "उदयते·····विधीयते" यह पाठ क प्रति में नहीं है ।
3 ख—दृशां ।
4 सकल रस·····न निचीयते" यह पाठ ख प्रति में नहीं है ।
5 ख—विज्ञातं ।
6 श्लोक संख्या दो से छः तक शालिनी छन्द है ।

रामास्तावन्त्येव रूपाणि तेनु-
स्तेनैवोच्चैः प्रेयसा संविहर्तुम् ॥ 5 ॥

तस्मिन् सज्जे रासलीलासमाजे
दिव्या एवासङ्ख्यमाविर्बभूवुः ।
विद्युद्वल्ली तुल्यभासो मृगाक्ष्यः
साक्षात्सीता देहरश्मिस्वरूपाः ॥ 6 ॥

तन्व्यस्तास्ताडिदङ्गताण्डवबलत्कन्दर्पकेलीकलाः[1]
कैशोरप्रसरद्वयस्मयरयप्रत्यङ्गलक्ष्मीबलाः ।
चन्द्राश्चाटुललोचनाञ्चलचमत्कारैकचञ्चद्रुचः
प्रोदञ्चत्कुचभारभङ्गुरवपुः श्लोभाः समन्ताद्बभुः ॥ 7 ॥

स तादृक्कान्तानां मधुरिमनिशान्ता[2]वयवभा-
वृतानामेतासामसममुखभासामविरतम् ।
रतं[3] ध्यायन्तीनां रघुपतिनवीनाङ्गरचनात् ।
समाजः प्रौद्भूतो निजनयनदूतोपकरणः ॥ 8 ॥

कलानाथो ज्योत्नानिविहकृतकृत्स्नावनिसुखाः
कुमुद्वत्यस्तस्यांशुभिरधिकमुद्धृत्य इह ताः ।
प्रकाशन्ते नाशं गमितमखिलाशङ्कितमं
ततस्तल्लीलायाः सकलमनुकूलं समभवत् ॥[4] 9 ॥

तप्तात्युत्तमदण्डकाटवितपस्तोमैर्वृहद्भानुजै-
र्भानूद्भासितभूरिभासुरसमुद्यद्ब्रह्मतेजोभरैः ।
विप्रैः क्षिप्रमिहार्थितो जनकजाकान्तस्स तेनात्मना
भोगानन्दविधानहेतव इति प्रादात्स तेभ्यो वरम् ॥[5] 10 ॥

तैर्ब्रह्मापि वरैरनेकरमणीरूपैरनन्तं कृतं
यत्सारस्वतकल्प एव ललितं केलीशतैर्लीलितम् ।

---

1 क—कलां, शार्दूलविक्रीडित छन्द है ।
2 क—न सांता ।
3 रतं-यह पाठ ख प्रति में प्राप्त नहीं है । शिखरिणी छन्द है ।
4 शिखरिणी छन्द ।
5 श्लोक संख्या दस से बारह तक शार्दूलविक्रीडित छन्द है ।

श्रीरामोद्य विधाय रासरसिकस्तत्संस्मृतिं चेतसा
सीता प्रार्थितपूर्तये कृततमां लीलां विचित्रां रहः ॥ 11 ॥

तत्रैवाविरभूत्प्रयत्नकलनादस्मादकस्मादहो
मूलश्रीवपुषः स्ववैभवपुषस्ता एव तुल्याः श्रियः ।
तासामन्तरमङ्गरूपपटिमप्राग्भारभावादिभिः
श्रीरामोपि विलोकयन्न किमपि ज्ञातुं बभूव प्रभुः ॥ 12 ॥

अकस्माद्ब्राह्मणामिह समुदयः प्राविरभव-
ज्झणत्कारो येषां झगितिपदमञ्जीर[1] रवयुक् ।
गणे यैर्गन्धर्वैर्विहितमिह गानं तदुदभू-
द्यतः सीतारामौ भृतहृदयकामौ व्यलसताम् ॥ 13 ॥

॥ अष्टपदी ॥ १६ ॥

सरयूतटलसदङ्गणरङ्गे नटति दवन्नटवरवेशम् ।
रामः सुभग तावदाकृति भृतमञ्जुलरूपनिवेशम् ॥ 1 ॥ ध्रुवम् ॥
कनकखचितमायूरपिच्छगणमुक्तामणिसमुदयशाली ।
कोटिसुधाकरदिनकरदीधितिदीपिततरद्युतिमाली ॥ 2 ॥ सरयू. ॥
[2]हरिहरिन्मणिमण्डितकुण्डलगण्डयुगलमण्डनधारी ।
अङ्गमुकुरनिकरप्रतिबिम्बितसद्विगुणितभूषणभारी ॥ 3 ॥ सरयू. ॥
अच्छकलितशुभकच्छमनोहरसच्छविजघनयुग्मशोभी ।
विपुलनितम्बभरोपरिपरिगतरसनादामनयनलोभी ॥ 4 ॥ सरयू. ॥
शिञ्जितचरणाम्बुजमञ्जीरकललिताङ्गुलिभूषणगणादी ।
घोषितघनघुं घुरवधर्षितसुरवनितौघकर्णसादी ॥ 5 ॥ सरयू. ॥
गुञ्जामणिमुक्ताहारावलितारागणहारिणी हृदये ।
श्रीवत्साङ्कमडकुलितरुचिभरनिजजनतिमिरमारहृदये[3] ॥ 6 ॥ सरयू. ॥
मुकुटतटावलम्बिगुञ्जासरवलितालकमानसमोहम् ।
कलितकपोलतलामलमृगमदमधुरिमकरिकासुखदोहम् ॥ 7 ॥ सरयू. ॥
आसादितनासानवमणिरुचिमथितभुवनवामाचित्ते ।
अङ्गदवलयरङ्गभृतिरामे रमते रमारमणवित्ते ॥ 8 ॥ सरयू. ॥
श्रीकृष्णेन कलानिधिना कृतमिदमतिशयरसभरभरितम् ।
भासयतु श्रीराघवचरितं प्रेमरसिकसेवकहरितम् ॥ 9 ॥सरयू. ॥

---

1 क—मञ्जरी, शिखरिणी छन्द है ।
२—हारिहरिन्मणि ।
३—हृदये ।

शृङ्गारितं सखिगणैरमणं निरीक्ष्य
शृङ्गारकल्पतरुमल्पितकल्पकामम् ।
रामं समेत्य स उदारसखीगणोपि
शृङ्गारयत्यमितधाम ललाम सीताम् ॥[1] 14 ॥

॥ अष्टपदी ॥ २० ॥

शृङ्गारयति सखी सुखकामा जनकसुतामतिशयपटुनामा ।
नर्मसखीभिरधिकमखिलाभिः सह कुरुते मण्डनमतुलाभिः ॥ 1 ॥ ध्रुवम् ॥
चरणाङ्गुलिभूषणततिमेका रचयति कलितसुरतरसेका ।
कल्पलतापल्लवगणमुदितं कुसुमसहितमिव मुदितम् ॥ 2 ॥
शृङ्गारयति. ॥
कापि दधाति यावकं रुचिरं चरणतले रक्तिममृतिसुचिरम् ।
लापयतीव ललितमनुरागं प्रियलोचनभूतमतिपरभागम् ॥ 3 ॥
शृङ्गारयति. ॥
कापि रचितमञ्चुलमञ्जीरा चरणपर्णमर्पयति सुधीरा ।
राजति राजहंस कुलजयिनी गतिरवकलाचमत्कृतिचयिनी ॥ 4 ॥
शृङ्गारयति. ॥
रजतलेपचण्डातकवसनं परिधापयति कापिधूतरसनम् ।
लेपयतीव चन्द्रिकासारं कल्पलतावपुषीवमुदारम्[2] ॥ 5 ॥
शृङ्गारयति. ॥
भृङ्गावलिमिव मधुमदमत्ता[3] मस्यति निहितगानगुणसत्ता ।
मदनमन्दिरद्वारसमीपे तोरणमिव तत्किमपि दिदीपे ॥ 6 ॥
शृङ्गारयति. ॥
कापि समेतविविधरुचिवामं परिधापयति चीरमभिरामम् ।
स द्युतिमपि विद्योतयतीयं हरिधनुरूपचपला जातीयम् ॥ 7 ॥
शृङ्गारयति ॥
कापि हस्ततलरञ्जनरचनं रचयति विजितसकलकविवचनम् ।
कलितमैन्दिरामन्दिरमध्ये मण्डनमिव सुरुचिभिरनुवध्ये ॥ 8 ॥
शृङ्गारयति. ॥
एतत्सुकविकलानिधिकथितं वागम्बुधेरमृतमिव मथितम् ।
सुखयतु विबुधावलिमविरामं हृदयकमलमानयतु च रामम् ॥ 9 ॥
शृङ्गारयति. ॥

---

1 वसन्ततिलका छन्द है ।
2 ख—वपुषीममुदारम् ।
3 ख—इव मदमत्ता ।

अन्याः काश्चित्कलाधन्याः प्रेम्णानन्याः प्रियाम्प्रतिः ।
भूषाशेषमुदासख्यः सविशेषं समादधुः ॥[3] 15 ॥

॥ अष्टपदी ॥ २१ ॥

कापि मकरिकापत्रनिवेशं मृगमदेन रचयति सनिदेशम् ।
मधुरमदनमुकुरायितलीले किमपि कपोलतले शुभशीले[2] ॥ 1 ॥ ध्रुवम्
कुचयोरुपरिरुचिररुचिमकरी रचयति कापि महामहिमकरी ।
मदनध्वजारोपमिव चक्रे हृदयप्रेमसदन इह वक्रे ॥ 2 ॥ कापि. ॥
कापि मधुरमाणिक्यसमूहं रचयति हारमतीवदुरूहम् ।
यामिनीव रेजे शशिवदना तारावलियुतदीपितमदना ॥ 3 ॥ कापि. ॥
काचनकाञ्चनखचितमुदारं कुचयोरुपचिनुते मणिहारम् ।
तरलो यत्र विराजति भासा विजिता येन रुचिः किल सा सा ॥ 4 ॥
कापि. ॥
कण्ठे कृतत्रिमणिक्रियासं कण्ठस्रजमर्पयति सहासम् ।
मन्ये समधिकरसभाजनया कामकम्बुमिव मण्डितमनया ॥ 5 ॥ कापि.
मुक्तायुगलमन्तरा मधुरं माणिक्यं रचयति नसि मधुरम् ।
उत्सहते सितमङ्गलचन्द्रानञ्चति हेमना विनिस्तन्द्रा ॥ 6 ॥ कापि. ॥
अधिकर्णं मुक्तामणिखचितं लसति कनकताटङ्कमुपचितम् ।
रुचिनिचयैरालीकररचितं शुशुभे नाकादिव समवचितम् ॥ 7 ॥ कापि.
किमपि भासते परितो भालं मुक्तासरयुगलं सुविशालम् ।
आगतमिव सेवितुमुत्तालं चन्द्रमशेषतारकाजालम् ॥ 8 ॥ कापि. ॥
जनकसुतामण्डनविधिमेवं सपदि वशीकृतरघुपतिदेवम् ।
शृणु सज्जनमज्जनमिह तनुपे सफलय सुकविकलानिधि जनुपे ॥ 9 ॥
कापि. ॥

कृतानल्पभूषाविधिर्जानकी सा
सखीहस्तविन्यस्तहस्ताङ्गुलीयैः ।
स्थिताभ्यां तदन्ते मणीकङ्कणाभ्यां ।
विरेजे यथा पुष्पिताकल्पवल्ली ॥[3] 16 ॥

विलम्बिस्फुटस्वर्णगुच्छद्वयाभ्यां
मणीमण्डिताभ्यां सुवर्णाङ्गदाभ्याम् ।

---

1 अनुष्टुप् छन्द है ।
2 क—चुम्बशीले ।
3 भुजङ्गप्रयात छन्द है ।

सखीनिमिताभ्यां त्वदोस्सन्निधानं
क्षणात्प्रापिताभ्यामतीवाभिरेजे ।।[1] 17 ।।

कस्तूरीबिन्दुरिन्दुप्रसृमरसुषमालब्धसङ्गः कुरङ्गः
किं वानङ्गस्य बाणे किल कुसुममये सप्रसङ्गोस्ति भृङ्गः ।
अङ्के वा पूर्णचन्द्रः कलयति रजनीकामिनी वाभिलीनां
किं वा ध्वान्तं नितान्तं लसति तदुदरे सङ्गृहीतं निपीतम् ।।[2] 18 ।।

तस्यामेकस्यामलमभिकस्यामितसुतपश्याफलराजी-
शृङ्गारितवत्यामतिशयमत्यां चतुरयुवत्यासुरलाजौ ।
सकला अपि वामा व्रभुरभिरामा मन्मथभामाविजयकृतः
सीता समवेषा हृदिभिनिवेषादतिभिदिलेपा रामभूतः ।। 19 ।।

तदत्र रामजानकीयुगं महागनोज्ञकं
वभूव मध्यनायकप्रभासमूहभासुरम् ।
रसेन वादयाम्बभूव वेणुमेणलोचना-
गनः सुमानमोचना विधानगानदक्षिणम् ।।[3] 20 ।।

तास्ताः साक्षान्मृगाक्ष्यः सपदि रुरुचिरे कोटिशो रामकान्तैः
सा मालाविद्युदम्भोधरपटलकृता मण्डलेस्मिन् विरेजे ।
अन्योन्यावद्धदोर्भिः सुरमणिरमणैर्निर्मितां सावलम्बै-
स्तासां मध्ये नु दीव्यत्तरलकृतगुणोत्कर्षभाजः समस्ताः ।।[4] 21 ।।

एका सा जनकात्मजा सुबहुभिर्नारीसमूहैर्युता
तत्रैको रघुवंशभूषणमणिस्तावत्स्वरूपैः प्रियैः ।
संयुक्तो रमयाम्बभूव रमणीस्ताश्चैव तावत्प्रिया-
स्तावन्मण्डितमण्डलान्तरगता रेजुर्गुणोत्कर्षणैः ।।[5] 22 ।।

चान्द्री ज्योतिः प्रसारश्चटुलतरचलच्चारुचुञ्चू[6] पुटाग्रै-
र्निष्पीतोभूच्चकोरैर्जनकनृपसुतावक्त्रचन्द्रानुयातैः ।

---

1 भुजङ्गप्रयात छन्द है ।
2 स्रग्धरा छन्द है ।
3 पंचचामर छन्द है ।
4 स्रग्धरा छन्द है ।
5 शार्दूलविक्रीडित छन्द है ।
6 ख—चारुचञ्चु, स्रग्धरा छन्द है ।

इत्येवं रासलीला वलयित विपुले मण्डले तौ युवानौ
तावद्भूपानुभावौ पदि पदि शुशुभाते सभूयः समाजौ ॥ 23 ॥

॥ अष्टपदी ॥ २२ ॥

रमणीयुता रमणावली शुशुभेतरामिहमण्डली ।
कनकोज्ज्वलामलविग्रहाः कृतकामदारविनिग्रहाः ॥ 1 ॥ ध्रुवम् ॥
झं झं झणत्कृतिकारिणी पदपद्मसत्परिचारिणी ।
पदनूपुरद्वितयांशुभा विरराज निर्जितभानुभा ॥ 2 ॥ रमणी. ॥
विचलत्कुचाञ्चलशोभया प्रियलोललोचनलोभया ।
विललास रासरसागता वनितावली रुचिसङ्गता ॥ 3 ॥ रमणी. ॥
कुचपाणिपङ्कजचालनैः सुषमाविघ्नलोचनलालनैः ।
कलयापि नो लभते तुलामतनु प्रियापि रमातुला ॥ 4 ॥ रमणी. ॥
प्रियरामणं रमणीशतं हरिरत्नहेममणीशतम् ।
तुलितं परस्परमेकतः स्फुटमाबभौ रससेकतः ॥ 5 ॥ रमणी. ॥
प्रतिबिम्बितं रसलीलया व्यरुचन्मनोहरशीलया ।
प्रणयावहैरनुवीक्षितैः रतिकाममोहनदीक्षितैः ॥ 6 ॥ रमणी. ॥
भुजयोः प्रसारणचारुता परिरम्भकेलिकलायुता ।
करकेशपाशविमर्शना प्रतिनीविकाहठदर्शना ॥ 7 ॥ रमणी. ॥
क्वचिदक्षिचुम्बनलालसा दशनक्षतादिकलालसा ।
कुरुते मुहूरतिवर्द्धनं रसरासकेलिसमर्द्धनम् ॥ 8 ॥ रमणी. ॥
इति गीः कलानिधि भाषिता रसिकोत्तमैरभिलाषिता ।
स्वजनैः श्रुतावानीयतां परिपीयतां हृदि धीयताम् ॥ 9 ॥ रमणी. ॥

एवं सञ्जिघ्रतूरिकेलिकलिते प्रत्यग्रकामोद्गमे
रामामोहनसंविधानमदने श्रीरामरासोत्सवे ।
भूयो भावितगीतवाद्यभवने प्रेमैकसम्भावने
त्रैलोक्यं मनसा मुमोह सहसा मग्नं रसाम्भोनिधौ[1] ॥ 24 ॥

शृङ्गारस्य परो विधिः सरसता सौन्दर्यसाराम्बुधिः
प्रेमानन्दकलानिधिः कविगिरामेको महासन्निधिः ।
वेदान्तार्थविचारनिर्मथित तल्लीला समृद्धिः परा
ब्रह्मानन्द परावधिः स्फुरतु मे रासस्य लीलाविधिः[2] ॥ 25 ॥

॥ इति श्रीरामगीते कविकलानिधीये रासवर्णनं नामाष्टमः सर्गः ॥ ८ ॥

---

1 शार्दूलविक्रीडित छन्द है ।

2 [illegible] प्रति में उपलब्ध नहीं है । शार्दूलविक्रीडित छन्द है ।

॥ नवमः सर्गः ॥

अथो सीता रामं रमयति निकामं निजसखी-
समाजैः संयुक्ता विमलमणिमुक्ताभरणभाक् ।
चिरं सा रासाख्या नवनवविलासातिललिता
बभौ श्रेयः शीलासरणि[1]रिव लीलारतिमताम् ॥ 1 ॥

॥ अष्टपदी ॥ 23 ॥

रमयति सीता दशरथनन्दनमङ्गमयूखसमूहैः ।
कोटिरमारमणीसाहस्रैरागमनिगम दुरूहैः ॥ 1 ॥ ध्रुवम् ॥
नूपुरवलयकिङ्किणीभूषणभङ्गात्कारमभिरामम् ।
विदधद्भिः प्रेमणि निदधद्भिर्मूलरमामथरामम् ॥ 2 ॥ रमयति. ॥
मिथो रसादाबद्धभुजैरलमंसगबाहुकलापैः ।
कोटिरमारमणीरमणैरिह शुशुभे सुरदुरवापैः ॥ 3 ॥ रमयति. ॥
ततथैं ततथैं थुङ्ग थुङ्ग थुङ्गत्थैः सुस्थिररावैः ।
स्थगितमभूदेतत्त्रिभुवनमनुजनितमुदावह भावैः ॥ 4 ॥ रमयति. ॥
चरणकमलविन्यास[2]लसद्भुजनिधुवनमोदनिदानैः ।
भृकुटीलासहाससुविकासैरजनि च तानविताने: ॥ 5 ॥ रमयति. ॥
अजनि[3] देवगुणगायनवादनविविधगुणैरुत्साहम् ।
रमारमणिगणरामावलयो रासरसे परिणाहम् ॥ 6 ॥ रमयति. ॥
विरमति सुरगन्धर्वविनिर्मितवादनगानविताने ।
पादन्यासमधुरनूपुररवमविभररविलसमाने[4] ॥ 7 ॥ रमयति. ॥
मध्ये मधुपकोकिलावलयो गुञ्जितकूजितकृत्यम् ।
गानसहितवादनमनुचक्रुः सम्भृतसुन्दरनृत्यम् ॥ 8 ॥ रमयति. ॥
मध्ये रामरसिकमुरलीरवविलसितमनुगतचित्तम् ।
सुकविकलानिधिरनुवर्णनमिदमकुरुत[5] रसिकसुवित्तम् ॥ 9 ॥ रमयति. ॥

भासा रासविलासलासललिता सा सा महामाधुरी
कासारादिव मज्जितोद्धृतवपुः कामेन वामेक्षणाः ।

---

1 क—ख—शरणि, शिखरिणी छन्द है ।
2 ख—चरण लसद्विन्यास ।
3 ख—अञ्जनि ।
4 ख—अविभररलमसमाने ।
5 ख—मिद-कुरुत ।

इत्यन्योन्यविशेषशोभिततया लालित्यलीलामृतो
भूयो लोभितलोचनाः शुशुभिरे लोकोत्तरालोकतः ॥[1] 2 ॥

पाथोदान्तरिताः स्फुरन्ति तडितः स्फूर्जन्ति पाथोधराः
प्रोद्यच्चन्तडिदन्तरेण सुषमा पीयूषवर्षामृतः ।
इत्थं राघवसङ्गता जनकजा तत्सङ्गता राघवाः
स्वेच्छानेकमनोज्ञरूपरुचिरा रुच्या चिरं रोचिताः ॥ 3 ॥

लोलल्लोचनलीलया विलसिता भ्रूभङ्गभङ्गीभरै-
र्भ्राजन्तेति सुवासहासललिताः केलीकलासङ्कुलाः ।
सीताराघवमूर्त्तयः समुदिता रासे विलासेन ते
योषित्पूरुषपुङ्गवा रतिरतीशानां विजिज्ञास्सतम्[2] ॥ 4 ॥

झं झं झणत्कारितचारुनूपुरा
नृत्येन चञ्चत्करचालनत्विषः ।
अन्योन्यभूयोभिनयप्रदर्शन-
प्रोद्यत्प्रमोदा व्यरुचन्विशेषतः ॥[3] 5 ॥

व्यालोलद्भुजनालकेलिकलिता वक्त्राम्बुजश्रीभृता
वक्षोजद्वयकोरकौघललिताः केशावली शैवलाः ।
रासे हासविलासतो विकसिता लालित्यलक्ष्मीयुताः
पद्मिन्यो रघुनाथकान्तमिलिताः सर्वाः सगर्वा बभूः ॥[4] 6 ॥

ईशो[5]भूच्चकितश्चिरेण रचितं मुक्तासमाधिं विधि-
र्वेदान्यासनिवृत्त एव ववृते सङ्गीतभङ्गीभरैः ।
मोहाढ्या इव योगिनः समभवन्देवाश्च देवाङ्गनाः
सद्यः सम्मुमुहुस्तदा जनकजा[6] श्रीरामरासोत्सवे ॥ 7 ॥

अश्मानो द्रवतामवापुरुदकं तत्सारवंशारवं
सद्यो निश्चलतामगात्त्रिभुवने जातो महान्सम्भ्रमः ।

---

1 श्लोक संख्या दो से चार तक शार्दूलविक्रीडित छन्द है ।
2 ख—विजिज्ञुश्चतम् ।
3 इन्द्रवंशा छन्द है ।
4 यहां से लेकर सर्गान्त पर्यन्त शार्दूलविक्रीडित छन्द है ।
5 क—ईशोभूच्चकितः
6 ख—जनकजा ।

शम्भो पद्मभुवश्च वाञ्छितमिवाचीतं समाधिव्रतम्
श्रीरामस्य विलासरासविभवे वंशीरवे दीव्यति ।। 8 ।।

दृप्यच्छूर्पणखाविरूपकरणादुस्थैर्जनस्थानत-
स्तत्रागत्य पतद्भिरान्तरमदव्याप्तात्मभिर्यातुभिः ।
संग्रामे मिलितश्चतुर्दशसहस्राख्यातसंख्यानि ता-
न्येकेनैव शतोत्तमेन शमयन् श्रीराघवः पातु वः ।। 9 ।।

।। इति श्रीकविकोविदचूडामणिमयूखमञ्जरीनीराजित-
चरणकमलदेवर्षि श्रीकृष्णभट्टविरचिते श्रीरामगीते
रासवर्णनं नाम नवमः सर्गः ।। 9 ।।

।। दशमः सर्गः ।।

मूलश्रियो जनकराजजनेः प्रकाश-
भेदेन केनचिदुपात्तमदेन रेमे ।
रामस्य मूलपुरुषोत्तमसंज्ञकस्य
कश्चित्कलातिकमनीयतमः प्रकाशः ।।[1] 1 ।।

तत्रैष पूर्णरसभोगमयीं चकार
लीलां निजाविगणितप्रतिबिम्बभेदैः ।
बालो यथा मुकुरमन्दिरमध्यवर्ती
रामः समस्तचिदुपासितचक्रवर्ती ।। 2 ।।

एकाकिनो न रमणं रसपूर्णभुक्त्यै
नाप्येकपत्न्युपगतस्य रघूद्वहस्य ।
तस्मादनन्तशतकोटिनिजस्वरूपैः
रेजे[2] रमा च रमणी रमणश्च रामः ।। 3 ।।

कदाचित्कामिन्या सरससरयूकुञ्जभवने
कयाचित्प्राणेश्या सकलनिशमासाद्य रमणम् ।
प्रभाते चान्यस्याः स्वरहितनिकुञ्जालयजुषः
समीपं सम्प्राप्य[3] प्रकटनयनोज्जागररसः ।। 4 ।।

---

1 श्लोक संख्या एक से तीन तक वसन्ततिलका छन्द है ।
2 ख—रेमे ।

जृम्भारम्भविजृम्भमाणवदनाम्भोजप्रसर्पन्मदा-
मोदः शोभितचूर्णकुन्तलभरश्रीमत्कपोलस्थलः ।
पादालक्तकरञ्जितभालतलगव्यालम्बिमुक्तासरः
स्रस्तव्यस्तकिरीटकोटिरददादेणीदृशेदर्शनम् ॥[1] 5 ॥

तददर्शनोद्बुद्धसमस्तयामिनी
निर्मुक्तभूयोविरहार्तिमग्नया ।
तया युवत्या स्वहितालिसन्निधौ
तदागसां राशिरथ प्रकाश्यते ॥[2] 6 ॥

॥ अष्टपदी[3] ॥ २४ ॥

सखि किं तमामनुवर्णये यादृशमभिकमाकर्णये ।
रमणीमनोमतिमोहनं रतिकाममङ्गलदोहनम् ॥ 1 ॥
परकामिनीसुरतेरतं भृशमन्यभूरिवधूमतम् ।
क्षणमक्षिमोदनलोभितं विटभावभूषणशोभितम् ॥ 2 ॥
सखिभाषयैनमिहागतं प्रणयैकमर्मपरागतम् ।
क्व निसारसादतिवाहिता क्व च ते मनोमतिराहिता ॥ 3 ॥
समदर्शि च क्वनुवश्यता भवतारसादनुवश्यता ।
नयनालिनौ क्वनु लालितौ तनुमाधुरीमधुपालितौ[4] ॥ 4 ॥
क्वनु यामिनीषु विरम्यते भवता प्रियापदि नम्यते ।
वहते तदङ्घ्रिगयावकं परचक्षुषामिव पावकम् ॥ 5 ॥
अधरोस्य कज्जलविन्दुना रमते मृगः सममिन्दुना ।
दलवीटिकारसचर्चिते नयने इवानिशमर्चिते ॥ 6 ॥
पटकेशवेशविपर्ययं लभते न कञ्चन[5] निर्णयम् ।
किमुहावदामि सुनिस्त्रपं[6] तनुते विलासमधिक्षपम्[7] ॥ 7 ॥
प्रयणो जनो न विमृश्यते रतिरस्य साधु न दृश्यते ।
किमथोवृथा परितप्यते चरितं किमस्य नु लप्यते ॥ 8 ॥
इति खण्डितामुख[8]जल्पितं कविता कलानिधिकल्पितम् ।
शृणु सज्जनश्रुतिसज्जनं कुरु चेतसा रसमज्जनम् ॥ 9 ॥

---

1 शार्दूलविक्रीडित छन्द है ।
2 इन्द्रवंशा छन्द है ।
3 इस अष्टपदी में ध्रुवम् का उल्लेख नहीं हुआ है ।
4 ख—तनुमाधुपालितौ ।
5 ख—किञ्चन ।
6 क—सुनिस्त्रयं ।
7 क—विलासमधिक्षयम् ।
8 ख—सुख ।

इति सरोपमनो जनकात्मजा-
कथितरूक्षवचोभिरनादृतः ।
प्रियतमो विरहागमदुर्मना-
स्समगमन्निजकुञ्जनिकेतनम् ॥[1] 7 ॥

तामेव स्मरबाणभग्नहृदयो रामश्चिरं चिन्तयं-
स्तस्या एव विलासलासललितैरन्तर्भृशं मोहितः ।
तस्या नर्मसखीं समेत्य स निजावस्थामिमां दर्शयन्
ब्रूते प्रेमसुधापयोनिधिपरीवाहे निमग्नान्तरः[2] ॥ 8 ॥

॥ अष्टपदी ॥ २५ ॥

कथय सखि त्वमिदं कथमासे प्रियया तया विनाहम् ।
दहतितरामङ्गानि मनोभूरविकविरहपरिणाहम् ॥ 1 ॥ ध्रुवम् ॥
लगति कृपाणी कोकिलवाणी तच्चिन्तनमनुचित्तम् ।
अलिकुलगीतं कलयति भीतं मामिह तदखिलवित्तम् ॥ 2 ॥ कथय. ॥
तामानय मानय सन्मानय मनसि वितानय मोदम् ।
त्वमधिकदक्षा मम धृतपक्षा कलय विलासविनोदम् ॥ 3 ॥ कथय. ॥
स्विद्यति रहसि वहति पुलकावलिमथ वेपथुमपि धत्ते ।
प्रसरदनङ्गं सखि न मदङ्गं ससुखं विदितं तत्ते ॥ 4 ॥ कथय. ॥
किमिति सरोषं किमुधृतदोषं प्रियाहृदयमनिदानम् ।
तामुपयामि नयामिनयामिह सुखयति किमपि विधानम् ॥ 5 ॥ कथयः ॥
सरयूकुञ्जे मिलदलिपुञ्जे सखि को वेद कुतोहम् ।
किमिति विलम्बित इति किमु धत्ते प्राणेशीहृदि मोहम् ॥ 6 ॥ कथय. ॥
सा मम वित्तं तामनुचित्तं तया विना मम सर्वम् ।
भाति सुरिक्तं जगदतिरिक्तं न वहे निजगुणगर्वम् ॥ 7 ॥ कथय. ॥
गत्वा तामनुरञ्जय सञ्जय सकुतुककेलिकलापे ।
तत्र तदनु मामाशयविदि नय दहति मनोभुवि पापे ॥ 8 कथय. ॥
कलहान्तरितजानकीविरहजदुःसहदुःखनिवेदम् ।
रघुनाथेन कथितमनुकथितं सुकविकलानिधिनेदम् ॥ 9 ॥ कथय. ॥

सा सखी सरसवाचिविदग्धा
जानकी रमणसन्निधितस्ताम् ॥

---

1 द्रुतविलम्बित छन्द है ।
2 ख—निमग्नान्तरम्, शार्दूलविक्रीडित छन्द है ।

जानकीमसुलभां किल तस्य
प्रापचिन्तितपरस्परमेलम् ॥[1] 9 ॥
सीता नर्मसखीसमागमसमुद्भूतस्मवावेशभृत्
पत्युस्तं[2] प्रणयापराधसमकृच्चित्ते[3] स्मरन्ती रहः ।
रोषोत्कर्षकषायितेक्षणतया निश्वासतापादिभि-
र्मीद्यन्मानमतङ्गजोपरि समारूढैव संलक्षिता ॥ 10 ॥

तामुवाचतरां वाचमिमां जनकनन्दिनी ।
पत्युरन्यत्रसंवासं निशयासादितव्यथा ॥[4] 11 ॥

॥ अष्टपदी ॥ २६ ॥

पश्य सखि पश्य मन्त्रियतमातिक्रमं यामिनीमन्यसदने कुरुत विश्रमम् ।
तावदिह कामवीरो[5] महाविक्रमं कलयते मयि शरैरात्मनो निःसमम् ॥ 1 ॥
सरसनरयूवने कुञ्जभवने घने रमति परयोषिता विदितमालीजने ।
शुद्ध इव चाटुकारेण भृशमानने दक्षिणो मनसि कपटावलिवितानने ॥ 2 ॥
कामि[6] इव यामिनी कामरसरञ्जितं विभ्रदलसं वपुः सुरतमासज्जितम् ।
अद्य मामागतो रागतो लीलया वश्यभावानुकलनैकनिजशीलया ॥ 3 ॥
कथय सखि किं क्षमे मन्तुमदवारितुं सकलनिशिमन्तरादुःखमिह धारितम् ।
तदपि मोहितमतिस्तेन लग्नाशया विस्मरणमेमि न हि तस्य बलिताशया ॥ 4
एवमपि निष्ठुरं वचनमपि भाषितं प्राणसदृशे प्रिये विगलदश्रिलापितम् ।
तत्र सखि किमनुशोचामि सहसाधुना साधितं चापि कलहेन किमसाधुना ॥ 5 ॥
दीपयति भालनं तस्य यदलक्तकं दहनमिव कोपमह्नाय हृदि सक्तकम् ।
अधरमञ्जनयुतं परमरञ्जनयुतं वीटिकादलरसैरक्षियुगमदभुतम् ॥ 6 ॥
अस्य हरते मनो रूपमपि साम्प्रतं गतं प्रतिकूलतामातुदति मां व्रतम् ।
यन्मया मदसुनाथैकमुदर्शनं हिततमं ज्ञातमलमुपसि सविमर्शनम् ॥ 7 ॥
तत्क्षमेनास्यमुखचन्द्रमहमीक्षितुं प्रेषये मानसं विरहमनुदीक्षितुम् ।
अलसलसदीक्षणं कलितपरमीक्षणं चकितमिवजृम्भणं विदधदनुवीक्षणम् ॥ 8 ।
समदगमनं वपुर्मदगजादनुकरणं[7] रोपयति हर्षयति पोषयति विकरणम् ।
इति निशा परगृहस्थितिरुषा नोदितं जानकीमापितं कलानिधिनोदितम् ॥ 9 ।

---

1 स्वागता छन्द है ।
2 क—यस्तुत्तं, शार्दूलविक्रीडित छन्द है ।
3 ख—क्वचित्ते ।
4 अनुष्टुप् छन्द है ।
5 ख—महावीरो ।
6 ख—काम ।
7 क—ख—गजादानुकरणम् ।

इत्युक्तं जनकजयाजयासदृक्षा
संश्रुत्य स्वहितमनाः सखी सखेदा ।
कान्तेन प्रहिततया वियोगभीत–
स्वान्तेन प्रतिमिलनाय तामुवाच ॥[1] 12 ॥

॥ अष्टपदी ॥ २७ ॥

अये जनकात्मजे का त्वया त्रिभुवने समा यद्यपि युवतिरुर्वशीत्रिभुवने ।
यत्र रज्येत रमणस्य तव सादरं मानसंकलितचिरविरहपृथुतादरम् ॥ 1 ॥
ध्रुवम् ॥
व्यर्थमाशङ्कितं विफलमातङ्कितं कलयसे किमिति सुरतेन वपुरङ्कितम् ।
भालमुकुरे गतासुरकरघोरणी विभ्रमं सृजति सालक्तरुचिचोरणी ॥ 2 ॥
अये. ॥
अस्य रदनच्छदे लसति रुचिदायिनी तव नयनतारकैवाञ्जननिधायिनी ।
त्वदनुरागो दृशा सर्वतो धीयते बोटिकारसतया किमिति परिचीयते ॥ 3 ॥
अये. ॥
वहति तव चिन्तनादेष पुलकावलीमतनुरासञ्जयति तामतिमहावलीं ।
किं किमलमात्मनो मानसविपर्य्यया दीक्ष्यते न किल विपरीतमपि वर्य्यया ॥ 4 ॥
अये. ॥
वश्यपतिकासि रतिकाममतिमोहिनी रमारमणस्य सखि शर्मभरदोहिनी ।
तत्र को वेद पतिरेष यत्कारणादाप निशि वासमिति तापयति धारणा ॥ 5 ॥
अये. ॥
अर्ककलिकागतो रमति किमु साहसादिति वचो मालती क्वचिदलिनमाहसा ।
यत्समनुलापयति तत्र गतदूषणे[2] दोषमिममञ्जसा भानुकुलभूषणे ॥ 6 ॥
अये. ॥
ऋते भवतीमसौ कल्पसममेककं क्षणमपि न नेतुमलमस्तरससेककम् ।
वाचमन्यस्य हृदि मैव मन्यस्व मे प्रणतिमुररीकुरु रमापति महारमे ॥ 7 ॥
अये. ॥
पापमति रापयति तापमसुयापनं तस्य हृदि मन्मथो मतेरपि धापनम् ।
मानवति मानमिह मुञ्च हठशालिनं लीलया जीवयततमालि वनमालिनम् ॥ 8 ॥
अये. ॥
कल्पलतिकासि सुखहासकुसुमालिनं राममभिराममुपयाहि रतिपालनम् ।
इति सखीभाषितं कलानिधिनाहितं सत्तमा इह मनोदत्त सुसमाहितम् ॥ 9 ॥
अये. ॥

---

1 प्रहर्षिणी छन्द है ।
2 क—गतिदूषणे ।

इत्याश्रुत्य सखीमुखात्प्रियतमस्यार्ति मनोभूकृतां
कान्तापि प्रसरद्वियोगभयजोत्कम्पानुकम्पायुतां ।
तत्रैवालिललोकसुन्दरगुणारामेभिरामेक्षणे
श्रीरामे निममज्जसा क्षितिसुतागाढे सुवाब्धाविव ।।[1] 13

स्वेदस्नेहरसप्रसारसरसां चित्रायितामञ्चितां
रोमाञ्चैः प्रणयाङ्कुरैरिव ततैः सर्वाङ्गसंसर्गिभिः ।
तामीषद्विरहार्तिदीनवदनां संलीनसर्वेन्द्रियां
दृष्ट्वा नर्मसखीसमात्तसमयौचित्यामवोचद्गिरम् ।।[2] 14 ।।

।। अष्टपदी ।। २८ ।।

किमिति विषीदसि[3] वसुधातनये
तवसन्निधिमभिकन्तमुपनये ।। 1 ।। ध्रुवम् ।।
त्वमिह विरहदुःसहरुजि मग्ना
तिष्ठसि कथमपि तत्स्मृतिलग्ना ।। 2 ।। किमिति. ।।
स च सन्नि तत्र सुदुःसहविरहं
वहतितरामतिसीदति निरहम् ।। 3 ।। किमिति. ।।
केयं मतिरासादितखेदा
तादृशि विफलविचिन्तितभेदा ।। 4 ।। किमिति. ।।
वश्यभावमनुपश्यसमन्ता-
दनुचरमिव ते मनसि समन्तात् ।। 5 ।। किमिति ।।

जय जयेति जयेति जगाद सा
प्रियमुदीक्ष्यमुदीरितमानसा ॥
जनकजाहृदयैकनिकेतनो
विजयतां प्रणयः स तवेति च ॥[1] 16 ॥

विलसतान्मिथुनं युवयोर्महा-
मधुरिमोदयमोहनरूपयोः ।
विजयतां रति[2] मन्मथयोर्युगं
जयतु[3] केलिकलासकुतूहला ॥ 17 ॥

प्रियः सविज्ञाय सुखीसखीमुख-
प्रसादचिह्नानुमितामुदारधीः ।
प्रिया मनो माननिवृत्तिमावहां
विधुर्यथा राहुविमुक्तमण्डलः ॥[4] 18 ॥

आवेद्य प्रियया विमुक्तमधुना मानं समानीय सा
सम्फुल्लामलनीलपङ्कजदलश्यामं कलामञ्जुलम् ।
रामं तच्चरणान्तिकेन नमयामास प्रयासं विना
दासं यद्वदुपासनैककलना सन्तोषित स्वामिनम् ॥[5] 19 ॥

आनते चरणयो रघुवीरे
मारमार्गणकलाभिरधीरे ।
अङ्गनापि जनकात्मजनिः सा
प्रेमजाश्रुमृतिचक्षुरकार्षीत् ॥[6] 20 ॥

सरयूतटमञ्जुकुञ्जभूमौ
चतुराकल्पचारुपुष्पतल्पे ।
रमणो रमयाम्बभूव रामां
स इमां कोटिरतिप्रभाभिरामाम् ॥[7] 21 ॥

---

1 श्लोक सोलह एवं सत्रह में द्रुतविलम्बित छन्द है ।
2 "रति" यह पाठ ख प्रति में अनुपलब्ध है ।
3 ख—जयति ।
4 वंशस्थ छन्द है ।
5 शार्दूलविक्रीडित छन्द है ।
6 स्वागता छन्द है ।
7 वैतालीय छन्द है ।

सम्फुल्लन्नवपुण्डरीकपटलीशोभापरीभावकृत्
क्षुब्धक्षीरसमुद्रमुग्धलहरीवैदिग्ध्य[1]विस्मारिणा ।
पीयूषद्रवदिग्धदीप्तिदलितस्वान्तान्धकाररजा
रामस्य स्मरणं प्रयातु करुणापूर्णाकटाक्षावलिः ॥ 22 ॥

इति श्रीगीतगोविन्दे खण्डितादिनायिका वर्णनं
नाम दशमः सर्गः ॥[2] 10 ॥

॥ एकादशः सर्गः ॥

अथ तरुवल्लिविचित्रे मित्रे मदनस्य चित्रपुष्पवने ।
रामं सेवितुकामः कामं जलदागमः समायातः ॥[3] 1 ॥

युक्ते प्राग्वातयानोत्तमजवगमने दीपसौरम्यसूते
लीलोद्वेल्लद्बलाकावलि ललिततुगे चञ्चलोद्भूतकेतौ ।
आरूढः कामवीरोभिनवजलधरस्पन्दने मन्दपाथो
धारासम्पातदारुणान् किरति विरहिणां चित्तसम्भेदनाय ॥[4] 2 ॥

मेघं तद्रूप[5] मेघाकृति कलितलसत्कुम्भगुण्डाशिरोङ्घ्रि-
द्वेषा माद्यद्बलाकावलिरदनयुगं चञ्चलोद्यद्ध्वजाढ्यम् ।
घण्टालङ्कोरघोषैर्घनमधिकघटाश्रीकुयं दिप्रयुक्षु-
र्दागारूढः करीन्द्रं विकिरति मदनः काममासारवारणान् ॥ 3 ॥

तडित्वन्तं दृष्ट्वा मधुरिमचमत्काररुचिरं
वपुः स्वीयं सीतासहितमनुकृत्योदिततमम् ।
वचोभिर्हृच्चारैः स्मररतिसमुद्दीपनकरैः
करोति स्वां कान्तामभिमत नितान्ताभिलषिताम्[6] ॥ 4 ॥

॥ अष्टपदी ॥ २९ ॥

समुदेति खे जनकात्मजा[7]जलदाघटाजलदामियम् ।
चपलेव नायककण्ठजाजनिहेलितावनिताह्रियम् ।

---

1 क—वैदिग्ध, शार्दूलविक्रीडित छन्द है ।
2 ख—श्रीखण्डितादिनायिका वर्णन नाम दशमः सर्गः ।
3 गीति छन्द है ।
4 श्लोक संख्या दो एवं तीन में स्रग्धरा छन्द है ।
5 ख—तद्रूप ।
6 ख—अभिलषिता, शिखरिणी छन्द है ।
7 क—ख—जनकजात्मजा ।

अथ तत्परस्परसंयुजं प्रिययोर्विना तनुते भियम् ।
विततं तमो बहुमूर्च्छना भरभवमिवाकुलयद्धियम् ।। 1 ।। ध्रुवम् ।।
न ज्योतिरिङ्गणगगनरिङ्गणशोभया परिभासितम् ।
स्मरकुटीयन्त्रसुयोजिता नलवर्तिकाभिरवासितम् ।।
घननीपकाननसौरभैरभितो वनं तरसासितम् ।
हरितामखण्डलमण्डलं क्षितिमण्डलेन सुवासितम् ।। 2 ।। समुदेति. ।।
पिककूजितं रतिपूजितं सुवधूजितं ध्वनिलीलया ।
परिवादिनी समनादिनीति तया विमोहनशीलया ।।
तव मेखलावलिकिङ्किणी कलनाय दत्तनिमीलया ।
समदालितत्या रणितवत्या राजितं कचनीलया ।। 3 ।। समुदेति. ।।
अवलीभवद्भ्रमरीशतं मरुदीरणानवलीलनम् ।
परिपुष्पितं नवलीवनं परितस्तमोमरशीलनम् ।।
इदमावयोरधिकं रहो रतिकेलये कृतकीलनम्
सङ्केतशालमिवावभौ न नवशोभिताभवदीलनम् ।। 4 ।। समुदेति. ।।
समदालिनी समुपेतकं दृशि केतकं न किमीयते ।
घनवातजातविसारभूरिपरागगाक्षणि दीयते ।।
सुविकासकारिकदम्बकाननमेतदेवमुदीयते ।
मदनेन किं गुलिकाघनुर्गुलिकोमरः सुनिचीयते ।। 5 ।। समुदेति. ।।
अनुरागजागुलिका इव प्रसरन्ति भूमिमितस्ततः ।
कृतवृन्दमिन्दुवधुटिका विधिनाहिता निजहस्ततः ।।
तनुभूषणं प्रियवल्लभा विदधुर्नखावधिमस्ततः ।
कलयन्ति कामविलासमेव रवेरहो मुहुरस्ततः ।। 6 ।। समुदेति. ।।
मदसुप्रिये शृणु तन्वि जानकि वल्लभे सुरदुर्लभे
शृङ्गारपोडशकं तनौ वहयत्प्रमोदमहं लभे ।।
त्वमुदारता गुणमण्डिता सुरवल्लरिप्रतिमल्लभे ।
त्रिदिवोपभोगनिवेद्यते[1] विरहाभिधं पशुमालभे ।। 7 ।। समुदेति. ।।
हरितोखिला हरितो वभुः परितो नवाल्पतृणावली ।
रतिनाथभूपसमासनं स इह स्थितो भवितावली ।।
तरुपुञ्जगुञ्जितमञ्जुता ममहत्तमामवलावली ।
ऋतुकेलिकारणतामितामवनावलीव वनावली ।। 8 ।। समुदेति. ।।

इति जानकीकरणामृतं रघुनायकेन वितानितम् ।
जलदागमोचितलीलया सह वर्णितं बहुमानितम् ।।

---

1 क—निवेद्यते ।

कविना कलानिधिना कृतं गुणिमण्डलेन सुगानितम् ।
कुरुते मुदं[1] नितरामिदं न तु दुर्जनैरवमानितम् ।। 9 ।। समुदेति. ।।

इति रघुपतिना समीरिताया,
जनकजनाधिपसिन्धुसम्भवायाः ।
परिचरणसुचारुचातुरीभृत्
कथयति नर्मसखी तमेव कान्तम् ।।[2] 5 ।।

।। अष्टपदी ।। ३० ।।

शाटी नाम चित्रपटमानय श्रीपरिधानकृतम् ।
प्रतिदेशं पटुशिल्पितमहिमाहित नानारङ्गभृतम् ।। 1 ।। ध्रुवम् ।।
अरुणरक्तपरिपीतसिताऽसितमणिभिरिवाकलितम् ।
श्रावणहरितहरितभूमीतललीलाभरलालितम् ।। 2 ।। शाटी. ।।
उन्नततमनवमेघघटोदयमानितिमञ्जुतमम् ।
यत्र सुवर्णपटीपरितः प्रियतडिताभाति समम् ।। 3 ।। शाटी. ।।
कुञ्जघरणि कमनीयशिखाबलकृतकलकूजितकम् ।
वनदेवतयेवाधिकसम्भ्रमसम्भृतपूजितकम्[3] ।। 4 ।। शाटी. ।।
कमलालयाललितकरकमलाहितकमलावरितम् ।
प्रतिदिशं[4]मुरुतच्छायतलेधिकसुषमाभरभरितम् ।। 5 ।। शाटी. ।।
महाराजजनकाधिपजाता सौभगभारभृता ।
स्नुषा महाराजाधिपदशरथसदनरमेवकृता ।। 6 ।। शाटी. ।।
त्रिभुवननाथ भवादृशनायक नयनचित्तनिहिता ।
रमणिवरावलिमौलिमणिः स्वयमेकाविधिविहिता ।। 7 ।। शाटी. ।।
सीतागणितमणितगुणवीता स्वामिन[5] तमेयमेका ।
राजिष्यति परिधाय यमेषा नयनसुधारससेका ।। 8 ।। शाटी. ।।
इति रघुनाथजानकीहिततम नर्मसखीमुखगेयम् ।
[6]तच्छ्रीकृष्णकलानिधिकविकृतमिति रसिकैरवधेयम् ।। 9 ।। शाटी. ।।

ततो राजाधिराजश्रीराजराजेन्द्रईश्वरः ।
प्रियाशृङ्गारसामग्रीं स्वयं समवधारयत् ।।[7] 6 ।।

---

1 क—कुरुतेमिदं ।
2 पुष्पिताग्रा छन्द है ।
3 ख—सन्तनुपूजितकम् ।
4 ख—प्रतिदिशि ।
5 ख—स्वामिनि ।
6 ख—न श्रीकृष्ण, क—त श्रीकृष्ण ।
7 श्लोक संख्या छः और सात में अनुष्टुप छन्द है ।

पटु नर्मसखीकर्मपरिकर्मसविस्तरम् ।
समजायत सीतायाः प्रीतायाः प्रियसन्निधौ ।। 7 ।।

प्रजाते शृङ्गारेखिलभुवनसारे रतिरमा
शचीशर्वाणीभिर्मधुरिमभरैर्दुर्लभतरम् ।
समग्रं सौभाग्यं निरुपमिति रूपं समुदितं
समालोक्य प्रेयानमितमुदिमग्नः समभवत् ।।[1] 8 ।।

।। अष्टपदी ।। ३१ ।।

सरयूतीरवने मणिमुक्ताविरचितसौधमुदारम् ।
मञ्जुलवञ्जुलकुञ्जलतावृतकेलीविलसदगारम् ।।
स्थानं सानन्दतमं किल यस्मिन् विहरति रामो जनकजया ।। 1 ।। ध्रुवम् ।।
विद्युल्लताविलासविभूषितनवघनगर्जितनादम् ।
अनुगतललितकलापि विकूजितनिर्मितमन्मथवादम् ।। 2 ।। सरयू. ।।
तडिदुद्योतचमत्कृतिपरिभवजनकसुतापटशोभम् ।
प्रतिपदरामरसिकनायकवरलोचनविरचितलोभम् ।। 3 ।। सरयू. ।।
केतककुसुमपरागविसारणविस्तृततरपटवासम् ।
हिमबालुकासमूहसमुल्लसदङ्गणभूमिसुवासम् ।। 4 ।। सरयू. ।।
रमणानुभावजातनवजलधरमृगमदसीकरवर्षम् ।
रमणीसहितरामपरिचयशिखिमुक्ततडिद्घनतर्षम् ।। 5 ।। सरयू. ।।
शुकसारिकासमाजनुतस्तुतगीतरघुपगुणसारम् ।
प्रतिदिशमुन्मदविविधविहङ्गमरुतसीतागुणभारम् ।। 6 ।। सरयू. ।।
तत्परिपुष्टिकृतेपरपुष्टकलध्वनिपटहविरावम् ।
तदनुसारिनवलतालसितदलकरभवदभिनवभावम् ।। 7 ।। सरयू. ।।
त्रिविधसमीरसुखदमिति सुकविकलानिधिभावितगीतम् ।
इह रममाणमभिकयुगलं ब्रह्मेति श्रुतिभिरधीतम् ।। 8 ।। सरयू. ।।

आमूलं फलगौरवेणविनताः[2] पुष्पावलीवर्षणै
रर्चन्तो मकरन्दचन्दनरसैर्धूपैर्भवद्दोहदैः ।
दीपैश्चम्पककोरकैश्चपिकगीस्तोत्रैः स्तुवन्तः सदा
धन्याः सारवतीरभूरुहवराः श्रीरामपूजापराः ।। 9 ।।

श्रीरामप्रावृषेण्यामृतजलदशमालोकनिस्थोन्मदानां
श्रीजानक्यङ्गविद्युद्विलसित[3] बहलोन्मीलदानन्दभाजाम् ।

---

1 शिखरिणी छन्द है ।
2 ख—वनिताः, शार्दूलविक्रीडित छन्द है ।
3 ख—विलसत, स्रग्धरा छन्द है ।

शश्वल्लावण्यलक्ष्मीमधुरिमसुषमासारपीयूषवर्षा-
तृप्तानां सारवक्ष्मावननरुशिखिनां धन्यतां वर्ण्यतां किम् ॥ 10 ॥

इह जलदागमलक्ष्मीः स्वयमेव सदैव जानकीमाति ।
तद्वर्णयति नितान्तं श्रीकृष्णः कलानिधिः सुकविः ॥[1] 11 ॥

॥ अष्टपदी ॥ ३२ ॥

जय देवि सीते रघुपतिसङ्गीते
जलदागमनवकमले सरयूवनगीते ॥ 1 ॥ ध्रुवम् ॥
चिकुरावलिलम्बितजलधाराभुपुभाभरललिते ।
कलितकनकचीरावृतितड़ितावलि वलिते ॥ 2 ॥ जयदेवि. ॥
रामजलदलालसतमलोचनचातकचटुलतमे ।
मञ्जीरावलिशिञ्जितशिखिगणनादरमे ॥ 3 ॥ जयदेवि. ॥
रामरसालरूपनव्याङ्कुरसंस्वादनशीले ।
कोकिलकाकलिकाकलकण्ठध्वनिलीले ॥ 4 ॥ जयदेवि. ॥
व्रतनुतप्तरघुपतिचित्तावनिरसवर्षणमोदे ।
पुलकपटललसदङ्कुरविरचनसविनोदे ॥ 5 ॥ जयदेवि. ॥
करवृतरञ्जनविन्दुपरिस्फुरदिन्दुवधूजाले ।
अवरघुतिपरिपुष्पितसन्ध्यारुचिमाले ॥ 6 ॥ जयदेवि. ॥
मधुरिमवर्षवितततगुणगवितरमणीकमलवने ।
मन्दहासविलसमालतीसौरभसारघने ॥ 7 ॥ जयदेवि. ॥
वक्रिमशालिशक्रधनुरुन्नतभृकुटीपरिकलिते ।
मुक्ताहारवलाकावलिशोभाललिते ॥ 8 ॥ जयदेवि. ॥
इति कविकोविदकृष्णकलानिधिकथितगुणग्रामे ।
जय जानकि जय सीते जय राघवरामे ॥ 9 ॥ जयदेवि. ॥

रम्येस्मिन् जलदागमे घनघटासञ्जातगर्जारवे
विद्युद्वल्लिविलासविस्तृतसमुद्वेल्लद्बलाकावली ।
शोभाशालिविशालशाद्वलमहीसशोभिलक्ष्मीमहा-
हिन्दोलापरिदोलनं विजयते श्रीजानकीरामयोः ॥[2] 12 ॥

॥ अष्टपदी ॥ ३३ ॥

जयति ललाम हिन्दोला ।
जानकीरघुनाथकल्पितललितगतिलोला ॥ 1 ॥ ध्रुवम् ॥

---

1 आर्या छन्द है ।
2 शार्दूलविक्रीडित छन्द है ।

माणिक्यमुक्ताजालयुक्तामुदितमदनमता
सङ्केतकाननकल्पतरुतलशोभितातिवता ।
कलकीरकोकिलकेलिकूजितकाकलीकलिता-
दोलनविचक्षणतरसखीगणकरकमलचलिता ।। 2 ।। जयति. ।।
स्तम्भद्वयीकृतकनकलेपनमहारत्नयुता
रविचन्द्रतडितालोकपरिभववैभवेन नुता ।
उच्चैरुदञ्चिततिर्यगाहितदारुमणिवलिता
संलग्नविविधविलम्बिगोलकराजितिलतलिता ।। 3 ।। जयति. ।।
कलकनकदण्डचतुष्टयी बहुदिव्यरत्नभृता
परिवेष्टितातुलविविधवर्णदुकूलशालिकृता ।
श्रीकविकलानिधिवर्णिता विधिचातुरीदलिता
अन्तर्विराजितजानकीरघुनाथपरिमलिता ।। 4 ।। जयति. ।।

।। अष्टपदी ।। ३८ ।।

रमारमणौ सखि हिन्दोले व्यतिभाते[1] ।
अवलोक्य रतिकामकलाशतविजयविलासवियाते ।। 1 ।। ध्रुवम् ।।
चतुराशावृतमधुपचकोरकृतनिजविषयनिपाते ।
विधिचतुरिमसुविनिर्गतविरचनशोभामरपरिजाते ।। 2 ।। रमा. ।।
मिलितपरस्परललितमाधुरीचपलाघनविनिपाते ।
रुचिरसहचरीकरचालनभवमन्दपवनमृदुयाते ।। 3 ।। रमा. ।।
शुभमणिमुक्तावलिविवलिततमनानावर्णविभाते ।
युगलविराजितरमारामवपुरतिशयलसदवदाते ।। 4 ।। रमा. ।।
तत्र कलितशृङ्गारसुवेशौ तौ रतिकामसमानौ ।
कनकनीलमणिसंयोगाहितसुषमाशोभितगानौ ।। 5 ।। रमा. ।।
नव सहचरीसमर्पितबीटीकलितपरस्परदानौ ।
पुरतो मुकुरतले मिलदाननकलिताधरमधुपानौ ।। 6 ।। रमा. ।।
दोलाचलनसमनुभूतस्फुटनीपकुसुमपवमानौ ।
नवघनघटाचमत्कृतचपलारचितरूपरुचिमानौ ।। 7 ।। रमा. ।।
चतुरसहचरीकृतसङ्गीतकमञ्जीरुचिमयमानौ ।
बीटीरागरज्यदरुणाधररुचि दशौ नयमानौ ।।[2] 8 ।। रमा. ।।
इति कविकृष्णनुतावभिरामौ ललितजनकजारामौ ।
जलदागमहिन्दोलासुखमनुभवतः स्थगितविरामौ ।। 9 ।। रमा. ।।

---

1 ख—व्यतिभाति ।
2 यह गीति ख प्रति में उपलब्ध नहीं है ।

रम्या सा सरयूसरित्पुलिनभूः सा कल्पवृक्षाटवी
तत्रोदेति तदन्तरा विजयते प्रासादउच्चैरिह ।
रत्नस्तम्भचतुष्टयान्तरलसन्माणिक्यसिंहासने
सीताराममयुगं नमामि निगमैर्यद्ब्रह्मनिर्णीयते ॥[1] 13 ॥

जानक्याः कुचयोर्मुखे नयनयोर्बिम्बाधरे च श्रिया
लुब्धान् कौकचकोरखञ्जनशुकान्निःपक्षपातम्भृशम् ।
सानन्दं परिपश्यतो न सहते तेनाटवीक्रीडना-
दन्तर्मोदगतो सदा दयितया श्रीरामचन्द्रोवतु ॥ 14 ॥

गृहेपि मधुपावली विवलनात्सदाचामरैः
सखीभिरनुवीज्यते तदनुपञ्जरस्थैः पिकैः ।
शुकैरपि चकोरकैरकलिनिर्मिमेषं[2] दृशे—
त्यनुक्षणमसूयता रघुवरेण सन्दीयताम् ॥ 15 ॥

श्रीघनऋतु[3]महोत्साहवर्णनं नामैकादशः सर्गः ॥ ॥

॥ द्वादशः सर्गः ॥

स्मरदारुणशरदारण[4]दरदादरदाहितोग्रविरहाणाम्[5] ।
मानवती करदा रतिवरदा शरदागता ततः पश्चात् ॥ 1 ॥

उदञ्चन्द्रास्या रुचिररुचिहास्याब्जकरयुग्-
मृणालीदोर्वल्लीविकचनवमल्लीगुणयुता ।
चकोराक्षी तारा कुमुदवरहारावलिधरा
वितीर्णान्तस्तोषा लसति वरयोषा शरदियम् ॥[6] 2 ॥

खेलन्मञ्जुलखञ्जरीटनयना पूर्णेन्दुबिम्बानना-
तारामण्डलमण्डनातिविशदज्योत्स्नादुकूलावृता ।

लोक संख्या तेरह व चौदह में शार्दूलविक्रीडित छन्द है ।
—निनिमेषं, पृथ्वी छन्द है ।
—धनरितु
—दारुण, गीति छन्द है ।
—विहारणाम् ।
6 शिखरिणी छन्द है ।

वक्षोजायित चक्रवाकमिथुना चञ्चन्मृणालीभुजा
फुल्लत्कोकनदौघपाणिचरणा भाते शरत्कामिनी ॥[1] 3 ॥

स्रोतः सूक्ष्मसिताम्बराढ्यपुलिनश्रीमच्चिलम्बद्वयी
हंसाली कलमेखलाकलकलैः केलीकलापाकुला ।
वातान्दोलितवीचिकात्रिवलिभृन्नाभीनिभावर्तिनी ।
चञ्चच्चक्रयुगस्तनी लघुशरद्दृष्ट्या शरन्नीयते[2] ॥ 4 ॥

क्षुब्धक्षीरधिमुग्धवीचिपटलैरापूर्य सर्वा मही-
माशां[3] काशविकाशकारि सहसा[4] संव्याप्य नाकालयम् ।
अद्याशेष जगद्विशेषवलीकारे धुरीणोद्धुरा
साम्यं काममहा[5]महीयशसा धत्तेशरत्कामिनी ॥ 5 ॥

ध्वान्तोत्सारविशारिचारुसरयूकुञ्जालयप्राङ्गणे
कल्पद्रोस्तलभूमिभूरिरचितावेदिः सुवर्णाञ्चिता ।
आस्थानी प्रतिभाति तत्र ललितारत्नाढ्यसिंहासने
यत्र श्रीरघुवंशभूपणमणिस्तिष्ठन् सदा शोभते ॥ 6 ॥

चन्द्रोदञ्चितचन्द्रिकाचयचमत्कारान्वितं सारवं
तोयं तुङ्गतरङ्गरङ्गकलनैस्तीरावनीसङ्गतम्[6] ।
तत्सम्बन्धिचलत्सुगन्धिपवनप्रोद्दीप्त चेतो भवः
काचिन्नर्मसखीमुवाच रघुपः सौन्दर्यसारोज्ज्वलः ॥ 7 ॥

॥ अष्टपदी ॥ ३५ ॥

अद्य मम मानसं नर्मसखि चिन्तयति जानकीमिलनमानन्ददानम् ।
पश्य मधुसाधवीमधुरमदमादिनी मधुपतति रयति सङ्गीतगानम् ॥ 1 ॥ ध्रुवम् ॥
गच्छ भृशमच्छ धिपणावति तदानयन तत्परा भव कमपि देहि मानम् ।
विद्धि यावत्सुभवनेषु चन्द्रानना रूपमिह भाति नो मम समानम् ॥ 2 ॥ अद्य. ॥
अद्य भृशमुज्ज्वला भासते कौमुदीकुमुदवनमोददानैकवीरा ।
तत्र गुञ्जतितमामधिकसुखदायिनी मोहिता मधुपमालातिधीरा ॥ 3 ॥ अद्य. ॥

---

1 श्लोक संख्या तीन से सात तक शार्दूलविक्रीडित छन्द है ।
2 ख—शरिन्नीयते ।
3 ख—आशा ।
4 ख—महशा ।
5 ख—काममहो ।
6 ख—सङ्गतः ।

चलति चन्दनचर्चितचर्चितनवतुमंजवमारुतलहरिरविकनीरा ।
कुचकलशोपरिचरकुसुमदनावयवधाम तामानयसि सुमतिहीरा ॥ 4 ॥ अद्य. ॥
कृत चन्दनरसलेपचर्चिततनूरजतपरिलिप्तपटसुपरिधाना ।
ललितनरमौक्तिका[1]वलिभिरतिराजिता रतिरमणमोहिनी शोभमाना ॥ 5 ॥ अद्य
विगलदसकलाभरणभारभरितप्रभा किमपि सौभगकलितदृष्टिदाना ।
तव प्रिया सपदि सामया सङ्गच्छतामच्छतासम्पदिव मोदमाना ॥ 6 ॥ अद्य. ॥
सैव हृदये वसति सा नयनयोरयति भाति करणेपि मम सैव वामा ।
विपुनपुलकावली कपटतो वपुषि मे सैव पीयूषरसतुल्यवामा ॥ 7 ॥ अद्य. ॥
तामहं भावये तामनुविभावये तामिह निभालये कलितकामा ।
मे तदनुचिन्तये रजनिदिनलग्नमतिरेतु सा मम दृशा याभिरामा ॥ 8 ॥ अद्य. ॥
ललितकविताकलानिधिसुभाषितमिदं जानकीरचितमभिसारसारम् ।
रामवचनोत्सुका सखी चलिता ततो यत्र हरिणीदृशो निजमगारम् ॥ 9 ॥ अद्य.

सा तत्र याता मनसि प्रजाता-
भिसारशातावयवावदाता ।
यत्रास्ति सीता श्रुतरामगीता-
गुणैर्गृहीता स्मरबाणभीता ॥[2] 8 ॥

सा तत्र गत्वा रमणेन मत्वा
तत्प्रेमतत्त्वाशयजातसत्त्वा ।
सुधीरवीर्नर्मसखी प्रवीणा
नितान्तवीणाकलवागुवाच ॥[3] 9 ॥

अष्टपदी ॥ ३३ ॥

शृणु जानकि मम वाचमुदारामेहि रमणसविधे बृहारा ।
विशदाभरणवसनपरिवाना समभिसर प्रियतममतिमाना ॥ 1 ॥ ध्रुवम् ।
रजतलिप्तमिदमनुपमचीरं सफलय भागधटितमणिहीरम्[4] ।
सफलय रुचिरमिमं शृङ्गारं पांडयधाविरचितसुखभारं ॥ 2 ॥ शृणु. ॥
कलय कामकलिते कलकेलि[5] मोहय रामरसिकमिहतेऽलिम्
त्वं किल सुरतरुसुमनः कलिका वलितविविधगुणहीरावलिका ॥ 3 ॥ शृणु.

---

1 ख—मौक्ति ।
2 प्रथम व तृतीय चरण में इन्द्रवज्रा तथा द्वितीय, चतुर्थ में उपेन्द्रवज्रा होने से उपजाति छन्द है
3 प्रथम व द्वितीय में इन्द्रवज्रा और तृतीय चतुर्थ में उपेन्द्रवज्रा के मिश्रण से बना उपजा छन्द है ।
4 द्वितीय चरण ख प्रति में अनुपलब्ध है ।
5 क—कलिकेलि ।

तडिदसि तनुरुचिजिततपनीया रामतनुर्जलधरकमनीया ।
समागमस्तव तस्य च भविता रतिमदनोभयसौभगमविता ।। 4 ।। श्रृणु. ।।
शुभतमालतरुकाननवल्ली मिल ते राजतु केलिमतल्ली ।
अद्य तनुं लुण्ठतु तव सारं त्रिभुवनरूपमाधुरीभारम् ।। 5 ।। श्रृणु. ।।
एकैव त्वमतुलरुचिसक्ता किम्पुनरिह रघुपतिपतियुक्ता ।
भव कुञ्जालयमञ्जुलजनिका नर्मसखी नय मानं दनिका ।। 6 ।। श्रृणु. ।।
परितो गुरुभिरनधिगतयाना रघुवरमभिसर लघुतरमाना ।
विकचवल्लिदल्लीवनवलिते सरयूतटवर्त्मनि सुखकलिते ।। 7 ।। श्रृणु. ।।
सौधादभिकसौधमागच्छे रुदयति कुञ्जभूमिरुपकच्छे ।
व्रजघनसारवालुकाकलितं रमणप्राङ्गणमतिशयललितम् ।। 8 ।। श्रृणु. ।।
सुकविकलानिधिकथितमनल्पं रामप्रेमवलितरसजल्पम् ।
रघुवरपरमभक्तिभरधारी श्रृणु सज्जनतत्पदपरिचारी ।। 9 ।। श्रृणु. ।।

इत्युत्साहितमानसां जनकजां नर्मालिकण्ठोत्थया
वाचा सञ्चरमाणकामविशिखव्याघूर्णमानामिव ।
सख्या योजितहंसवाहनरथारूढाशरत्कौमुदी
ज्योतिर्जातयुते पथि प्रचलिता वाग्देवतेव स्वयम् ।।[1] 10 ।।

सीतासङ्गसखी जनाङ्घ्रिकलितैर्भृं भृंणत्कारिभि-
र्मञ्जीरैर्मिलितौ प्रियाचरणयोर्झङ्कारिणौ[2] नूपुरौ ।
माद्यत्कुञ्जररा जमन्थरलसद्गत्या चमत्कारिणौ
वाद्यन्मन्मथदुन्दुभी इव मनो रामस्यतो जह्नतुः ।। 11 ।।

स्वप्रिया[3] नूपुरारावमाकर्ण्य तां
रामचन्द्रो रसादासनादुत्थितः ।
तन्मुखालोकनायोत्सुकः संययौ
द्रष्टुमिन्दुं चकोरो यथा चञ्चलः ।। 12 ।।

तपनीय शिलामनोज्ञभासां
तडितां मध्यगता तडिल्लतेव ।
व्यरुचज्जनकात्मजैव तासां
त्रिजगन्मानसमोहनौषधीव ।।[4] 13 ।।

---

1 श्लोक संख्या 10 व 11 में शार्दूलविक्रीडित छन्द है ।
2 ख—झङ्कारिणौ ।
3 ख—प्रति में स्वप्रिया पाठ अनुपलब्ध है एवं क—ख—में लक्ष्मीधरं यह अतिरिक्त पाठ भी मिलता है । स्रग्विणी छन्द है ।
4 मालभारिणी छन्द है ।

चारुवञ्चलपटाञ्चलमध्या-
हसञ्चरदिभरभिकायकटाक्षैः ।
लोचने समभिलालयमानां
जानकीं सहचरी समुवाच ॥[1] 14 ॥

॥ अष्टपदी ॥ ३७ ॥

परिपश्य जानकि नायकं रघुनायकं सुखदायकम् ।
इममीक्षया समसायकं शरदच्छचन्द्रसहायकम् ॥ 1 ॥ ध्रुवम् ॥
अमुमीक्षते विरहातुरं दधदन्तरं रतिमातुरम् ।
तव चिन्तनैकविचक्षणं परिजातमन्मथलक्षणम् ॥ 2 ॥ परिपश्य. ॥
इममञ्च पञ्चशराहतं नहि कापि तादृशमाहतम् ।
रतिकै[2]तवाधरसीधवे प्रणयैकरीतिमतीधवे ॥ 3 ॥ परिपश्य. ॥
भव तन्वि मोदविसारिणी स्मितशोभिमौक्तिकहारिणी ।
कुरु कामकौतुककारिणी रमणे रतिं मतिधारिणी ॥ 4 ॥ परिपश्य. ।
अयमाननं तवशोभनं रुचिरूपलोचनलोभनम् ।
शशिनं चकोर इवानिशं परिपश्यतीति दधानिशम् ॥ 5 ॥ परिपश्य. ।
अयमम्बुजे इव तापिते हिमपाततो रुजमापिते ।
मिलनं विना तव वेदना हृदये स्म किन्नु निवेदना ॥ 6 ॥ परिपश्य. ॥
तदतः परं जनकात्मजे प्रियमेतदेव[3] सदा भजे ।
इति भावमन्तरमानये रहमात्मना सखि मानये ॥ 7 ॥ परिपश्य. ॥
त्रिजगच्छिरामणिमानये प्रणयं रसेन[4] वितानये ।
तव पादयोरिह पातये स्वजनव्यलीलितजातये ॥ 8 ॥ परिपश्य. ॥
कविना कलानिधिना कृतं रघुनाथलीलितसम्मृतम् ।
प्रियनर्मसख्युदितां गिरं निजकर्णमानयतां चिरम् ॥ 9 ॥ परिपश्य. ॥

सख्यैवं परिदर्शितं प्रविलसत्कुञ्जालयं द्वारगं
रामं काममुपेत्य कामितमहालीलालिलाषप्रदम् ।
दूरादेव पटाञ्चलान्तरङ्गया दृष्ट्या निरूप्य प्रियं
पूर्णानन्दपयोधिमध्यनिपतत्पीयूषमग्नाभवत् ॥[5] 15 ॥

कल्पद्रुमतलानल्पतल्पजातनिवेशनाम् ।
वीक्ष्य नर्मसखी सीतां शीतांशुवदनां जगौ ॥[6] 16 ॥

---

1 स्वागता छन्द है ।
2 ख—रसिके ।
3 क—प्रियमेतमेव ।
4 क—रणेन ।
5 शार्दूलविक्रीडित छन्द है ।
6 अनुष्टुप् छन्द है ।

॥ अष्टपदी ॥ ३८ ॥

इह सुन्दरि कुरु कामविलासम् ।
पिब जानकि रघुपतिमुखमासम् ॥ 1 ॥ ध्रुवम् ॥
सफलय रुचि चटुले निजनयने ।
प्रियतनुरूपरचितसुखशयने ॥ 2 ॥ इह. ॥
सत्करकमलकलितकरकमला ।
समनुव्रज सहसादिवकमला ॥ 3 ॥ इह. ॥
चिरविरहित[1] रुचिशिथिलितदेहम् ।
मनसिजकोटिविजयिगुणगेहम् ॥ 4 ॥ इह. ॥
सानन्दय रमणं मृशमधुना ।
लीलारसावेशिनं मधुना ॥ 5 ॥ इह. ॥
यामो वयं सुमुखि कृतकृत्या ।
युवयो रहसि सरससुखवृत्या ॥ 6 इह. ॥
अमलकमलमालादिरचनया ।
मध्ये विरचित रुचिरवचनया ॥ 7 ॥ इह. ॥
रतिपतिहासकथाभिरनन्तम् ।
मुदमर्जयतमुदारमुदन्तम् ॥ 8 ॥ इह. ॥
सुकविकलानिधिकृतमभिरामम् ।
सखीगीतमानय हृदि कामम् ॥ 9 ॥ इह. ॥

यातास्वालिषु मञ्जुकुञ्जसुमनो मालादिनिर्माणतः
सांद्योगासु तदुत्तरोत्तररतिक्रीडाविनोदावहम् ।
अन्योन्याननवीक्षितेन दधती स्वानन्दकौतूहलं
रेमेसौ रममाण एव रमया रामस्तया रामया ॥[2] 17 ॥

याते नर्मसखीजने बहिरतः कान्तानिशान्तान्तरे
कान्ताङ्कव्यतिषङ्गतः स्मरशरश्रान्ता नितान्ताशया ।
तस्यैवाननचन्द्रमुज्झितचलच्चक्षुर्निवेषां मुहुः
पश्यन्ती परमप्रमोदजलधेरन्तर्जगाहेतराम् ॥ 18 ॥

कामं शर्वशरासनादपि गुणैर्गुर्वीपरं सुभ्रुवः
सा वक्रा भ्रकुटीति चेतसि निजे जातावहेलाभरः ।

---

1 ख—चिरविरहज ।

मज्यत्तत्क्षणमेव तादृशमसौ कृत्वा परैर्दुर्वहं
मध्ये श्रोटयति स्म सोयमुदया रामोस्तु रामो मुदे ॥ 19 ॥

इति श्रीशरदवर्णनसोल्लासविलासो नाम द्वादशः सर्गः ॥

॥ त्रयोदशः सर्गः ॥

वचनरचनैरालीवृन्दे प्रमोद्य परस्परं
कृत मनसिजानन्दालापे गते रतिकुञ्जतः ।
समुपित चलल्लज्जासज्जे दृशौ मुखमुस्मितं
कमपि हृदये हर्षं दृष्ट्वा जहर्ष हरिः स्वयम् ॥[1] 1 ॥

आलीकल्पितकौसुमतल्पेनल्पेन मोदजलेन ।
सुखयन् हस्तगृहीतां सीतां सीतांशुरुचिमनौ प्राह ॥[2] 2 ॥

॥ अष्टपदी ॥ ३६ ॥

कुरुतामवितल्पं निजचरणं भवतीभवभयहरणम्
प्रतिदेशं जात[3]स्थलपङ्कजशोभामधुरिमभरणम् ॥ 1 ॥ ध्रुवम् ॥
काममनोरथपूरणसुफलितसुरतरुदलरुचिधरणम् ।
मम लोचनसङ्कामितरागजसौभगभवविस्तरणम् ॥ 2 ॥ कुरुता. ॥
चिरविरहानलदूयमानतरजनमानसनिस्तरणम् ।
सन्ततसक्तसमुच्चदलत्कररुचिभरसहजाभरणम् ॥ 3 ॥ कुरुता. ॥
बहुसौभाग्यभाग्यमिव[4]धरणेरविरतभविकवितरणम्[5] ।
कमलालयानिवासकमलमलिहंसकरवभङ्करणम् ॥ 4 ॥ कुरुता. ॥
कामकेलिकौतूहलकलनादभिलाषोदधितरणम् ।
अङ्गुलिभूषणरवसञ्चारित्तचारुचटकचुङ्करणम् ॥ 5 ॥ कुरुता. ॥
निर्भरसुरतारम्भसुसम्भ्रममुदितमदन्तःकरणम्[6] ।
रतिविक्षोभणनयनविलोभनमितरविषयविरमरणम् ॥ 6 ॥ कुरुता. ।
चञ्चदञ्चिनखचन्द्रचन्द्रिकाचित्तचकोरविचरणम् ।
क्वचन मानसमये मम मस्तकमणिमयूखसञ्चरणम् ॥ 7 ॥ कुरुता. ।

---

1 हरिणी छन्द है ।
2 गीति छन्द है ।
3 ख—जातं ।
4 ख—भाग्यधरणे
5 ख—भाविकवितावरणम् ।

अनुलवलग्नलोचनालोचितलालितललितविहरणम् ।
मम मानसतुलितामलकल्पिततल्पलालङ्करणम् ॥ 8 ॥ कुरुता. ॥
सुकविकलानिधिगीतमिदं नवरमणिमुदाविष्करणम् ।
सुखयतु भक्तजनं रसनिपुणं सीतारघुपतिशरणम् ॥ 9 ॥ कुरुता. ॥

इत्युक्ता[1] जनकात्मजा तदभिकल्पमाभिलाषोद्भवं
श्रुत्वा वाक्यमनल्पमोदजननं रोत्साहचित्तारती ।
झं झं झङ्कृतनूपुरारवमनोहारिस्वमङ्घ्रिद्वये
तस्मिंस्तल्पतले दधार मनसीवाभ्युत्सुका प्रेयसः ॥ 3 ॥

नानाबन्धविनोदमोदनकलाकेलीभिरेकान्ततः
कन्दर्पांशुगकौतुकेन सुरतारम्भे समाप्ते[2] पुरा ।
पश्चा'दभूरिविलासमग्नमनसा रामेण सम्प्रार्थिता
सीतासौ विपरीतरीतिं[3]सुरतारम्भाय भेजे त्रपाम् ॥ 4 ॥

नीचैः कृत्य दृशौ[4] तदीक्षणतृषौ वक्त्रे विधाय भ्रुवौ
सीनालम्बनसावकाशपिकगीरास्ये निषेधाक्षरम् ।
किञ्चित्किञ्चिदतेपि रक्ष्य कलनान्नित्येव सिद्धान्तितं
मत्वासौकमतः कलाभिरधिकं सम्मोहयामास ताम् ॥ 5 ॥

श्रीमज्जानकिकामकाननकुतप्रोल्लासलीलालसा
युक्ता सुन्दरमन्दहासकुसुमैर्लावण्यसत्पल्लवा ।
मन्दं मन्दमितस्मराशुगमरुल्लीलावशोत्कम्पिनी
त्वं तत्त्वं परिवेत्सि मन्मनसि[5] यत्प्रेमाधिकं[6] वर्तते ॥ 6 ॥

हंहो ते रजतानुलिप्तवसनस्यैषा चमत्कारिता
मुक्ता हीरकमञ्जुमण्डनविधा तद्दत्प्रमोदावहा ।
श्रीखण्डद्रवनिर्मिताच्छमकरी चञ्चत्कपोलद्वये
वक्षोजद्वितये च भाति हृदये सन्धिक्षयन्ती स्मरम् ॥ 7 ॥

एषा धीरसमीरलोललहरी लीलावशात्सारवै-
रम्भोभिर्वलिता परागकलिता पङ्केरुहाणां मुहुः ।

---

1 ख—इत्युक्त्वा, श्लोक संख्या तीन से आठ तक शार्दूलविक्रीडित छन्द है ।
2 ख—समासे ।
3 क—ख—रीत ।
4 ख—दृशौ ।
5 ख—मन्मन ।
6 ख—प्रियत्प्रेमाधिकं ।

नानाबन्धकलाढ्यपूर्वमुरतस्वेदाम्भसो मार्जनात्
पञ्चेशोहं दि दीपयन्ति नितरां नर्मस्पृशोमार्गणान् ॥ 8 ॥

इदानीं मे याच्ञा सुतनु विपरीतं रचयितुं
यदेवैतद्द्वयं द्वयमिह रतिस्पन्दनभरे ।
तदेकं यत्राभूत्तवचरणभङ्जीररणितं
परे काञ्चीनादक्वणितयुजमीहे[1]हमधुना ॥ 9 ॥

तत्त्वं प्रसीद जनकाधिपराजजाते
मत्कामनाविषयपूरणमेव कर्तुम् ।
हर्तुं चिरेण विनिपातयतः शरीरं
कामस्य तापमघरामृतदानपानैः ॥[2] 10 ॥

हे तप्तहेमरुचिराङ्गि मदीय वक्ष-
स्यम्भोधरे तडिदिवाचरचारुनृत्यम् ।
श्रीमत्तमालतरुरूढलसत्सुवर्ण-
वल्ली[3]वलल्ललिति[4]वेल्लितकानि कुर्याः ॥ 11 ॥

॥ अष्टपदी ॥ ४० ॥

मौनमर्पय नूपुरङ्गिणये मरालरवालये ।
मेखलानिनदेन सुन्दरि कर्णयुगमनुलालये ॥ 1 ॥ ध्रुवम् ॥
तव कुचद्वयमत्तवारणकुम्भयुगमभ्यस्यताम् ।
मदुरसि स्फुटवप्रपातनकेलिमञ्चतुरस्यताम्[5] ॥ 2 ॥ मौन. ॥
तव मुखं चिकुरावलीभिरिदं दधातु शुशोभताम् ।
उभयतो रजनिप्रियावलितः शशीव च शोभताम् ॥ 3 ॥ मौन. ॥
सुरधुनीधारेव हारावलिभिरुच्छलतादियम् ।
जघनयुगलं तावकं द्युतुविदलकदलियुगश्रियम् ॥ 4 ॥ मौन. ॥
बिम्बाधरे तव मामकं सुखमेतु रतिसंयोजनम् ।
वहतु किमपि कपोतिकानिजकण्ठराववियोजनम् ॥ 5 ॥ मौन. ॥
भवतु रतमव्यक्तकण्ठजरवपरम्परयायुतम् ।
कामशररोषादिवाधरदशनपीडनमद्भुतम् ॥ 6 ॥ मौन. ॥

---

1 क—यजमीहे, शिखरिणी छन्द है ।
2 श्लोक संख्या दस एवं ग्यारह में वसन्ततिलका छन्द है ।
3 वल्ली यह पाठ ख प्रति में अनुपलब्ध है ।
4 ख—वल्लल्लल्लित ।
5 ख—रम्यताम् ।

विद्युद्गुञ्जितभूतलापुरम्बरस्थितिरस्तु ते ।
अङ्गमिपतो रमणि सम्प्रति तप्तहेमगुणस्तुते ॥ 7 ॥ मौन. ॥
शुक्तियुगलविलम्बिनीनवतारकावलिरीक्ष्यताम् ।
कर्णभूषणमौक्तिकावलिरतनुश्रमणि दीक्ष्यताम् ॥ 8 ॥ मौन. ॥
रामगीतमिदं मुदा[1] विपरीतरतिरसयाचितम् ।
कविकलानिधिकथितमुत्कटकामकेलिकथाचितम् ॥ 9 ॥ मौन. ॥

आमुक्ता भवदाननस्य परितो धिरतीर्णकेशावली
श्वासोच्छ्वासपरम्परा भजति न स्थैर्यं सकम्पाधरा ।
खेदस्वेदजशीकरावलिरभूत् प्रत्यङ्गमाविस्तरा-
मित्येवं विपरीतरीतिसुरताम्भोधिः कथं तीर्यताम् ॥[2] 12 ॥

अत्यर्थं विपरीतयाचनविधिः पादप्रणामावधि-
र्दृष्टो नर्मसखीभिरद्भुततया साश्चर्यदम्भिरतदा ।
सीतापाणितले लिलेख चतुरा काचित्कृपाणीलतां
कान्तस्यालिकशालिनी व्यरुचयत् सिन्दूररेखां सखी ॥ 13 ॥

आलस्यादिव मौनमास्तचरणाम्भोजस्य मञ्जीरक-[3]
द्वन्द्वं सा मणिमेखला समनदत्कन्दर्पसन्दर्पतः ।
इत्थं तत्पुरुषायितेन कलितं केलीकलाकौतुकं
योषात्वं स्थगयाम्बभूव मदनस्यैतत्प्रतापोर्जितम् ॥ 14 ॥

जङ्घाद्वन्द्वमयुद्धसर्वपुरतो भारो नितम्बे पत-
द्बिम्बोष्ठस्य कपोलयोश्च समभूद्दन्तक्षतानां भरः ।
कामिन्या रतिसङ्गरे स्मरशरावेशस्खलत्कञ्चुकी
मध्यादुल्लसिती[4] स्तनौ मदवशान्मुक्तौ मतङ्गाविव ॥ 15 ॥

अथोवाच सीता परं प्रेमनीता
प्रियेण प्रतीताशया[5] रत्यभीता ।
गुणग्रामगीता सखीभिर्विनीता
स्वभूषाः सुरीतावुपेतुं धुरीताः ॥ 16 ॥

---

1 क—सुदा ।
2 श्लोक संख्या बारह से पन्द्रह तक शार्दूलविक्रीडित छन्द है ।
3 क—मञ्जीरकं ।
4 उल्लसितं ।
5 ख—प्रीताशया ।

॥ अष्टपदी ॥ ४१ ॥

मण्डय मम चरणौ रघुनन्दन नवतरुपल्लवराजितौ ।
यदवधि न जानन्ति मम[1] सख्यः सुरतमनोजकलाजितौ ॥ 1 ॥ ध्रुवम् ॥
तव नयनानुरागरुचिभावकथनतरणावकपाथसा ।
शोभाभूषितभाग्यभरानिव जनयति सम्प्रति नाथ सा ॥ 2 ॥ मण्डय. ॥
जघननितम्बचन्द्रिकामिव कुरु वरचण्डातकवाससा ।
नीलनिचोलघने चपलेव सदैव रहो विललासिसा ॥ 3 ॥ मण्डय. ॥
मण्डय मध्यतनौ मणिमण्डितमञ्जुरसनकलादामकम् ।
कामविजयवादित्रमिव श्रुतिपूजितकूजितधामकम् ॥ 4 ॥ मण्डय. ॥
तत्पुरतो विरचय वरचतुरविरोचनमिव शुभरत्नकम् ।
नाभीसरसि मनवगाहितुमनुविष्टमुदितमतिवत्स्नकम् ॥ 5 ॥ मण्डय. ॥
मृगमदचन्दनलेपमकरिकापत्रविभाति विभासिते ।
कुचयुगले विरचय हारावलिमिह तारावलि[2]भासिते ॥ 6 ॥ मण्डय. ॥
सरसकुसुमरससारविचर्चिततकञ्चुलिकामिह धारये ।
चन्द्रहारमणिदीधितिदीपितपरमसुभगशोभारये ॥ 7 ॥ मण्डय. ॥
मनसिजजयकम्बुस्त्विषि कण्ठे कापि भवतु कमनीयता ।
तव करकमलकलितनिर्माणं त्रिभुवनकारमर्गायता ॥ 8 ॥ मण्डय. ॥
इति कविसभासभाजनभाजनसुकविकलानिधिभाषितम् ।
जयति जानकीभूषणरचनं सज्जनिरनिशमभिलाषितम् ॥ 9 ॥ मण्डय. ॥

एतदन्तमिदमात्ममण्डनं
प्रोच्य रुच्यवचनाथ जानकी ।
भूरि मण्डयितुमात्मनो मुखं
दृष्टिगोचरमवोचत प्रियम् ॥[3] 17 ॥

॥ अष्टपदी ॥ ४२ ॥

मण्डय मम वदनं सुखसदनं शारदशशिरुचिगञ्जनम् ।
अधरविभाभावकयावक[4]लसदौदयिकद्युतिरञ्जनम् ॥ 1 ॥ ध्रुवम् ॥
भाले तिलकितगोरोचनमनुविरचय मृगमदबिन्दुकम् ।
गुरुणा सह सङ्गमय सिहिकासुतमुज्झितशरदिन्दुकम् ॥ 2 ॥ मण्डय. ॥

---

1 'मम' यह पाठ ख प्रति में अनुपलब्ध है ।
2 ख—हारागण ।
3 रथोद्धता छन्द है ।
4 क—यावलक ।

रूपसुधासागरजतरङ्गे दिव्यकनकनौकागतम् ।
सितकुजरजनीकरबिम्बत्रयमासयनसि भूषामतम् ॥ 3 ॥ मण्डय. ॥

सरसकुसुमरससारसचिचकरणमलका[1]वुभयत आननम् ।
शोभय भुजगानिव चन्द्रामृतपानसुखाधिकमाननम् ॥ 4 ॥ मण्डय. ॥

रचय कपोलयुगे घनचन्दनमकरीरतिशयशोभिते ।
नाथ कलय निजनयने चन्दिरनिरतचकोरविलोभिते ॥ 5 ॥ मण्डय. ॥

श्रवणयुगे ताटङ्कयुगलमिह ललितहेमहिन्दोलके[2] ।
दोलय रविशशियुगलमुदित्वरमञ्चितनीलनिचोलके ॥ 6 ॥ मण्डय. ॥

लोचनकामवीरयुगलं मम कलितकटाक्षकृपाणकम् ।
अञ्जनकवचमहो परिधापय भृशमतिकविगणभाणकम्[3] ॥ 7 ॥

रुचिरमुभय[4]पाटीकृतचिकुरप्रकरे शुभमुक्तागणम् ।
सीमन्ता[5]भरणं रघुनायक रचय तमोभरवारणम् ॥ 8 ॥ मण्डय. ॥

इति कविताकुशलैककलानिधिकविकुण्ठेन सुभाषितम् ।
जयति जनकतनयातनुमण्डनमतिरभिकैरभिलाषितम् ॥ 9 ॥ मण्डय. ॥

वेणीं मण्डय राजिमौक्तिकमतिश्रेणीं त्रिवेणीमिव ।
प्रोद्यत्सुन्दररक्तपट्टगुणभासद्धारतीस्रोतसम् ।
स्नात्वा यत्र पुनस्त्वदीयनयने प्रत्यग्रगुण्यप्रभा
चञ्चच्चञ्चलचारुवीचिनिचये सानन्दतां प्राप्स्यत: ॥[6] 18 ॥

यावत्कामशरातिवेगसुरतप्रत्यङ्गमम्मर्दना-
द्वस्त्रालङ्करणाङ्गरागविगमो नालीजनैर्लक्ष्यते ।
तावत्त्वत्करपङ्कजत्वरिततावेशात्समस्तं वपु:
पूर्णं पूर्ववदेवभूषणभरैर्भर्त्तः समालोक्यताम्[7] ॥ 19 ॥

यद्यन्मण्डनमङ्गमङ्गमभितो लब्धुं[8] मुहुर्मण्डितुं
शक्तं सम्प्रति तस्य तस्य समभूद्भूय:[9] स्वयं मण्डनम् ।

---

1 ख—सचिकमलकावुभयत ।
2 ख—हिन्डोलके ।
3 ख—कविभाणकम् ।
4 क—रुचिरमनय ।
5 क—शोमन्ता ।
6 श्लोक संख्या अठारह से इकीस तक शार्दूलविक्रीडित छन्द है ।
7 क—समालोक्यतम् ।
8 ख—लुब्धं ।
9 ख—भूपः ।

इत्थं भूयसि भूष्यभूषणभरेण्योन्यं न्यवस्थां[1] विना
धन्यो मण्डयति स्म रामरसिकः कामानिरामद्युतिः ॥ 20 ॥

लीलालापकलापकौतुकभरे सञ्जायमाने मुहुः
प्रेक्षालिङ्गनचुम्बनाद्यविरतप्रज्ञेन जज्ञेतराम् ।
अन्योन्यप्रसरत्प्रमोदपटलप्रत्यूहवद्भ्यां प्रियः
पाणिभ्यां विततार मोहितरते रङ्गेषु भूपाविधिम् ॥ 21 ॥

॥ अष्टपदी ॥ ४३ ॥

मङ्गलकरणे कमलाधरणे यावकरागवितरणे ।
चक्रे चरणे मानसहरणे रघुपतिरतिरतिशरणे ॥ 1 ॥ ध्रुवम् ॥
मृदुरवधीरीं कलमञ्जीरीं निधुवनरणजयवीरीं ।
भूषयति स्म पदे हंसाविव सेवितसरसिजतीरीं ॥ 2 ॥ मङ्गल. ॥
मुद्रितनयनमुपाचरदङ्गं चण्डातकवरसङ्गम् ।
समयोजयत तया तडितासह नीलपटे घनरङ्गम् ॥ 3 ॥ मङ्गल. ॥
मनसिजसौधसदनमध्ये वरतोरणमिव परिरेजे ।
मधुरमेखलादामतथाविधमतिशयरुचिमिह भेजे ॥ 4 ॥ मङ्गल. ॥
अङ्गरागरसरुचौ कुचौ किल चक्रे तदुपरिहारम् ।
शम्भुयुगलमिव तदपि विरेजे धृतगङ्गाजलधारम् ॥ 5 ॥ मङ्गल. ॥
पीतकञ्चुकीकलितपयोधरयुगलमतुलमभिजातम् ।
कमलरजसि लुठितं तद्गुणमिव चक्रद्वयमुपयातम् ॥ 6 ॥ मङ्गल. ॥
मुक्तचन्द्रामृतधारा इव मणिहारविदधतु रूपम् ।
कलशद्वय सुगृहीता इव ता मदयन्ति स्मरभूपम् ॥ 7 ॥ मङ्गल. ॥
कमलमूलमनुगतमलिवलमिव वलयावलिरतिरेजे ।[2]
पाणिमूलमणिमच्छविभूषण[3]विमलविभामतिभेजे ॥ 8 ॥ मङ्गल. ॥
रघुपतिरसिकरचितमतिमञ्जुलभूषणगणसुविधानम् ।
सुकविकलानिधिभाषितमुदयतु सततानन्दनिधानम् ॥ 9 ॥ मङ्गल. ॥

वर्षित[4] राघवनायकमानसा
त्रिभुवनेपि सुनिस्तुतनायिका ।

---

1 ख—न्यवस्थं ।
2 ख—वलयावलि रेजे ।
3 क—ख—मणिमच्छ भूषण ।
4 ख—वर्षित ।

सपदि कान्तिमद्वत्तविभूषणैः-
जैनकजानकजातयशोरहा[1] ।। 22 ।।

धत्ते यत्ते द्विपाटीकृतचिकुरचटीचारुचञ्चत्फणाग्रे
रत्नं चानूर्यगुम्फस्फुटकुटिलगतिपृष्ठपट्टावलम्बी ।
अत्यारूढो गृहीतुं वदनविधु[2]सुधां श्यामवेणीभुजङ्गो
दृष्ट्वा नासामयूरीं स्थगितमतिरिव[3] प्रेक्ष्यते तत्र संस्थः ।। 23 ।।

धनुस्ते भ्रूयुग्मं हरिणमृद[4]विन्दुर्मधुकरी
गिरिं पूर्णं पौष्पस्तवकमनुमाला च जलधिः ।
तदेतत्संयोज्य प्रसरति समस्या मनसि मे
धनुः शृङ्गे भृङ्गस्तदुपरि गिरिस्तत्र जलधिः ।। 24 ।।

गुणैः स्फीते सीते शशिशतकशीतेन वपुषा
चकोरौ सन्नेत्रे[5] हरिणशिशुनेत्रे सुखयसि ।
अथो कान्ते स्वान्तं मदनरविसातं मधुनिशा-
धनं भूयो मानं कुमुदवनमानन्दयति च ।। 25 ।।

त्वदीयं ताटङ्कं रुचिररुचिरङ्कं दिनमणे-
रभूद्विम्बं यस्मादुपचितमकस्मान्मणिगणैः ।
रतौ यस्यान्दोलद्द्विः[6]गुणगुणलोलस्य सहसा[7]
हसार्होभूत्तारा कुलवलिततारापतिरति ।। 26 ।।

प्रहीहन्ते नाभीस्फुरदमितरूपामृतभृत-
स्तदन्तर्गामार्या नयनमवगाढुं क्षमति नो ।
न चेदेवं रोमावलिरुचिररज्वा जनमनो
घटीं बध्वाकामः क्षिपति कथमाकर्षणकरः ।। 27 ।।

चञ्चद्यावककञ्चुकोपरिलसद्भूषाविशेषप्रभा
युक्ताभिर्मणिभर्मवर्मतनुभिः पादाङ्गुलीभिस्तव ।

---

1 ख—जनकजातयशोरवा, द्रुतविलम्बित छन्द है ।
2 क—विधि, स्रग्धरा छन्द है ।
3 ख—स्थगितमितिरिव ।
4 ख—हरिणमद, श्लोक संख्या चौबीस से सत्ताईस तक शिखरिणी छन्द है ।
5 ख—मन्त्रे ।
6 क—आन्दोल द्विगुण ।
7 ख—महसा ।

कर्तुं कल्पतरोर्दलै[1]रभिनवैः[2] सङ्ग्रामिकप्रक्रिया-
मारब्धे किमयं रसालकमलोद्भूता नवाः पल्लवाः ॥ 28 ॥

कन्दर्पस्य निधिस्थले रुचिपय पूर्णे सरस्यम्बुजे
स्वद्वक्त्रे नयनद्वये परिनदत्प्रेमानके जानकि ।
रज्यत्खञ्जनमञ्जरञ्जनमलिश्रीगञ्जनभ्राजित
यौग्ये योग्यतरानुपङ्क्तकलनादत्यर्थमामासते ॥[3] 29 ॥

इति रणभृतां जङ्घाविम्बोष्ठचारुपयोधर-
द्वयकरकपोलानां सत्कारमेव वितन्वती ।
ससुखमददात्तत्तद्योग्यानि वस्तुवराणि सा
चिकुरनिकरे चक्रे पश्चाद्विलम्बिनिबन्धनम् ॥[4] 30 ॥

सीमान्तदङ्घ्रिपद्मावधिमधुरमणीमञ्जरीयावकाम्भो-
मञ्जीरावृश्चिकान्याभरणविरचनासौष्ठवं स्वं निवेद्य ।
जानक्या राघवोऽपि स्मितमुखकमलेनाथ चञ्चत्कटाक्षैः
साक्षान्नीलञ्जखण्डैस्तनुरुचिकनकस्रग्भिरभ्यर्चितोभूत् ॥[5] 31 ॥

रामे श्रीरघुवंशमौक्तिकमणौ पद्माकरोल्लासद
प्रोद्यत्पूर्णिममुल्लसत्कुवलयानन्दैकचन्द्रोदये ।
दूरादारितदानवारिलहरीसिक्ता[6]रिमातङ्गमा
सुव्यस्ताग्रकरे परे परतरेऽपारेभिरामे रमे ॥ 32 ॥

वंशे वीरविदेहजे जय जय व्यक्तावतारे त्वयि
स्वान्तं कान्तनिशान्तमन्तर[7]महोत्तान्तं तनोतूत्तरम् ।
त्वय्येवाविरतं रतं न विरतं भूयात्कदाचित्तदा
स्वानन्दाख्यपदे तदेकमनसा कामाभिरामे रमे ॥ 33 ॥

---

1 क—कल्पतरोर्दलै, शार्दूलविक्रीडित छन्द है ।
2 क—अभिनवै ।
3 शार्दूलविक्रीडित छन्द है ।
4 हरिणी छन्द है ।
5 स्रग्धरा छन्द है ।
6 क—सि····रिमातङ्गमा, श्लोक संख्या बत्तीस से छत्तीस तक शार्दूलविक्रीडित छन्द है ।
7 ख—निशान्तमान्तर ।

काव्यव्याकृति[1] लब्धसंस्कृतपदैर्नव्यार्यवद्भिः पदै-
रव्याजं रचयामि किञ्चिदुचितं नव्यार्थयुक्तं वचः ।
नाहं सज्जननिर्विचाररचनासञ्चारणोच्चारितै-
र्वाचां पल्लवितैरकाण्डकवितासत्ताण्डवाडम्बरः ॥ 34 ॥

त्वं पीयूषदिवोपि भूपणमसि द्राक्षे परीक्षेत को
माधुर्यं तव विश्वतोपि विदिता माध्वीकसाध्वीकथा ।
एतत्किन्तु तथाप्यरुन्तुदमिव ब्रूमो वयं साम्प्रतं
यः काव्यामृतपानजो मधुरिमा नान्यत्र कुत्रापि सः ॥ 35 ॥

माधुर्यं प्रसरत्सुधारसरमाधुर्यं समास्वादन-
स्वानन्दे रसिकोत्तमाः किल समाधुर्यं नराः केचन ।
श्रीश्रीकृष्णकलानिधानकविना तस्यायनं सम्प्रति
प्रोक्तं राघवजानकीसुचरिते सञ्चारिकाव्यं नवम् ॥ 36 ॥

ये पीयूषद्रवीणातिजयकलरवीणाच्छ्रवीणाप्रवीणा
तत्सर्वांखर्वगर्वासहनमहह यन्माधुरीसाधुरीतिः ।
श्रीकृष्णाख्यः कविस्तज्जगति जनितवान् जानकीरामगीतं
प्राज्ञाः शृण्वन्तु मान्यान्निधिरिह सकलानां कलानां कलानाम्[2] ॥ 37 ॥

॥ इति श्रीकविकलानिधिश्रीकृष्णभट्ट विरचितं रामगीतं सम्पूर्णम् ॥
॥ शुभमस्तु । कल्याणरस्तु । सम्वत् १८७६ ॥

---

1 क—व्याकृत ।
2 'कलानाय' यह पाठ ल प्रति में अनुपलब्ध है । अन्धरा छन्द है ।